स्वयमेव संस्कृत-शिक्षणम्

लेखकः सम्पादकश्च
डॉ. जीतराम भट्टः
निदेशकः

डॉ. गोस्वामी गिरिधारी लाल शास्त्री प्राच्य विद्या प्रतिष्ठानम्
दिल्ली सर्वकारः
कार्यालयः- भूखण्डसंख्या-५, झण्डेवालानम्,
करोलबागः, नव देहली-११०००५

स्वयमेव संस्कृत-शिक्षणम्

लेखकः सम्पादकश्च

डॉ. जीतराम भट्टः

निदेशकः

डॉ. गोस्वामी गिरिधारी लाल शास्त्री प्राच्य विद्या प्रतिष्ठानम्

दिल्ली सर्वकारः

कार्यालयः- भूखण्डसंख्या-५, झण्डेवालानम्, करोलबागः नवदेहली-११०००५

स्वयमेव संस्कृत-शिक्षणम्

प्रकाशकः-
डॉ. जीतराम भट्टः
निदेशकः
डॉ० गोस्वामी गिरिधारीलालशास्त्री प्राच्यविद्याप्रतिष्ठानम्
दिल्ली सर्वकारः
कार्यालयः- भूखण्डसंख्या-५, झण्डेवालानम्,
करोगबागः नवदेहली-११०००५

प्रथमं संस्करणम्-२०१४
प्रतयः-५००

मूल्यम् - शतम् रूप्यकाणि
रू० १००/-

मुद्रकः-
डॉल्फिन प्रिंटो ग्राफिक्सः
४ई/७ पाबला बिल्डिंगः, झण्डेवालानविस्तारः
नवदेहली -११०००५

सम्पादकीयम्

संस्कृतं शिक्षितुम् सारस्वतोद्योगायास्मै भवतां भवतीनाञ्च हार्दिकमभिनन्दनम्। भवन्तो भवत्यश्च जानन्त्येव यत् संस्कृतभाषा विश्वस्य सर्वासु भाषासु प्राचीनतमाऽस्ति। पुरा इयं भाषा लोकभाषारूपेण व्यवहृता आसीत्। वर्तमानेऽपि भारतीयभाषासु संस्कृत-भाषायाः शब्दाः प्रचलिताः सन्ति। संस्कृत-भाषा सरला अस्ति। व्यवहारेण भाषा-शिक्षणे सारल्यम् जायते। वर्तमाने भाषा-शिक्षणाय विविधाः रीतयः लोके प्रचलिताः सन्ति, तास्वन्यतमा वर्तते संभाषणविधा व्यवहारशैली वा। विगतेभ्योऽनेकेभ्यः वर्षेभ्यः संस्कृत-शिक्षणाय संस्कृतव्यवहार-प्रकारोऽधिकः लोकप्रियः सञ्जातः। लोकेऽस्य प्रभावोऽप्यधिकः दृश्यते। कतिपयेषु दिवसेष्वेव जनाः संस्कृत-वार्तालापे दक्षाः भवन्ति। वस्तुतः भाषा सम्भाषणेन व्यवहारेण वा आयाति। वर्तमानेऽनेकाः संस्थाः संस्कृत-शिक्षणायेमां रीतिमेव स्वीकृत्य संस्कृतव्यवहारं प्रेरयन्त्यः सन्ति।

संस्कृत-व्यवहार-शिक्षण-क्रमे यदा जिज्ञासूनां पार्श्वे समयो न भवति अथवा संस्कृत-व्यवहार-केन्द्रस्य संयोजनस्याभावो भवति, तदा जिज्ञासुः स्वयमेव संस्कृतशिक्षणं कुर्यादित्युद्देश्यं विचिन्त्यैव पुस्तकमेतत् प्रकाश्यते। यद्यपि नैके पाठ्यक्रमाः, ग्रन्थाः शब्दकोशाश्च प्रकाशिताः प्रसारिताश्च सन्ति, किन्तु पुस्तकमेतत् स्वयमेव भाषाशिक्षण-मितिदृष्ट्या लिखितं वर्तते, यस्मिन् लोके बहुधा प्रयुज्यमानानां शब्दानां क्रियाणाञ्च रूपाणि, उपसर्गाः, अव्ययाः, सामान्यदिनचर्याया- मुपयोगिशब्दाः, व्यावहारिकैः लघुवाक्यैः सहिताः संस्कृत-संवादाः, वाक्यनिर्माण-प्रकाराः, सन्धयः, संख्याः, कारकाणि, गीतानि, शब्दकोशः, अभ्यासाः, संस्कृतशब्दानां हिन्दीभाषायामर्थाः, दशदिनेषु संस्कृत- व्यवहार-प्रशिक्षणाय पाठ्यक्रमश्च निबद्धाः सन्ति। यद्यपि संस्कृते प्रथमादिपुरुषाणां

क्रमपरम्परा प्रथम-मध्यमोत्तम-क्रमेणैव वर्तते, किन्त्ववबोधनाय सौविध्यं भवेदेतदर्थमुत्तमपुरुषस्य प्रयोगः पूर्वं कृतः तदनुक्रमेण मध्यमप्रथम-पुरुषयोश्च प्रयोगाः सन्ति। पाठा अपि एवम्प्रकारेणैव योजिताः सन्ति। एषः प्रयोगः केवलं भाषा-शिक्षणायैव परिवर्तितः। जिज्ञासूनां कृतेऽन्येऽपि नवीनाः रुचिकराः प्रयोगाः पुस्तकेऽस्मिन् प्रयुक्ताः सन्ति।

अस्य पुस्तकस्य प्रकाशने योगदानाय मुद्रकस्य प्रतिष्ठानस्य कर्मचारिणश्च कृतज्ञोऽस्म्यहम्, तान् प्रति धन्यवादं ज्ञापयामि। आशासे पुस्तकमेतत् संस्कृत-भाषा-शिक्षणाय जिज्ञासूनां कृते सहायकं भविष्यति। संस्कृतस्य प्रसाराय प्रयासोऽयं सुफलो भविष्यतीति मे प्रत्ययः। पुस्तके यदि काश्चित्त्रुटयः स्युस्तर्हि मार्गदर्शनाय निवेदयत्ययं जनः।

दिनाङ्कः ३१.०३.२०१४

विदुषां वशंवदः

डॉ० जीतराम भट्टः

निदेशकः

विषय-सूची

सोपानम्-१

प्रारम्भिक-अभ्यासः

लघुवाक्यानि

अभिवादन-वाक्यानि

अभिवादये	अभिवादन/नमस्कार।
आयुष्मान् भव (पुँ.)	दीर्घजीवी हो।
आयुष्मती भव (स्त्री.)	दीर्घजीवी हो।
स्वस्ति ते	शुभ हो।
शुभमस्तु	शुभ हो।
सर्वतः मङ्गलं भूयात्	सब प्रकार से मंगल हो।
समीचीनम्	अच्छा।
वरं तावत्	तब तो ठीक है।
आगम्यताम्	आइए।
स्थीयताम्	बैठिए।
सुप्रभातम्	सुप्रभात।
नमस्ते/नमस्कारः/नमस्करोमि/नमो नमः	नमस्ते/नमस्कार।
शुभरात्रिः।	शुभरात्रि।
धन्यवादः।	धन्यवाद।
स्वागतम्।	स्वागत है।
क्षम्यताम्	क्षमा कीजिए।
कृपया।	कृपया/कृपा करके

पुनः मिलामः।	फिर मिलेंगे।
अस्तु।	जी/जी हाँ/ठीक है।
श्रीमन् (पुँ.)!	श्रीमान जी!
मान्ये! /आर्ये! (स्त्री.)	मान्या (मैडम)!
बहु समीचीनम्	बहुत अच्छा।
स्वीकरोतु	स्वीकार करिए।
अवश्यम्	अवश्य।

परिचय - वाक्यानि

अहम् नरेशः, भवान् कः? (पुँ.)	मैं नरेश हूँ, आप का नाम?
अहम् सुरेशः।	मैं सुरेश हूँ।
अहम् साधना, भवती का? (स्त्री.)	मैं साधना हूँ, आप का नाम?
अहम् भावना।	मैं भावना हूँ।
भवतः नाम किम्? (पुँ.)	आप का शुभनाम?
भवत्याः नाम किम्? (स्त्री.)	आप का शुभनाम?
मम नाम महेशः।	मेरा नाम महेश है।
मम नाम सौम्या।	मेरा नाम सौम्या है।
अयं मम मित्रं नरेशः।	यह मेरा मित्र नरेश है।
एतेषां विषये श्रुतवान्।	इनके विषय में सुना है।
एषा मम सखी 'सरला'	यह मेरी सखी सरला है।
भवान् किम् कार्यम् करोति?। (पुँ.)	आप क्या करते हैं?
भवती किम् कार्यम् करोति?। (स्त्री.)	आप क्या करती हैं?
अहम् अध्यापकः अस्मि। (पुँ.)	मैं अध्यापक हूँ।
अहम् अध्यापिका अस्मि। (स्त्री.)	मैं अध्यापिका हूँ।

भवान्/भवती कस्यां कक्षायां पठति?	आप किस कक्षा में पढ़ते हो?
अहं दशम कक्षायां पठामि।	मैं दसवीं कक्षा में पढ़ता/पढ़ती हूँ।
अहं द्वादश कक्षायां पठामि।	मैं बारहवीं कक्षा में पढ़ता/पढ़ती हूँ।
भवतः ग्रामः? (पुँ.)	आपका गाँव कहाँ है?
मम ग्रामः वसन्तग्रामः।	मेरा गाँव वसंत गाँव है।
भवत्याः गृहम् कुत्र?(स्त्री.)	आपका घर कहाँ है?
मम गृहम् पहाड़गंजे अस्ति।	मेरा घर पहाड़गंज में है।
कुतः साम्प्रतम्?	कहाँ से आ रहे हो?
गृहात् आगच्छामि।	मैं घर से आ रहा हूँ।
भवतः/भवत्या किं वृत्तम्?	आपका क्या समाचार है?
कुशलं वा?	कुशल हो?
कथमस्ति भवान्?	आप कैसे हो?
गृहे सर्वे कुशलिनः वा?	घर पर सब कुशल हैं?
सर्वे कुशलिनः।	जी हाँ, सब कुशल हैं।
कः विशेषः?/कः समाचारः?/का वार्ता?	क्या बात है? क्या समाचार है?
भवान् एव वदतु।	आप ही कहिए।
कोऽपि विशेषः?	कुछ विशेष है?
भवान्/भवती कुतः आगच्छति?	आप कहाँ से आ रहे हैं/आ रही हैं?
अहं विद्यालयतः आगच्छामि।	मैं विद्यालय से आ रहा/रही हूँ?
अहं गृहतः आगच्छामि।	मैं घर से आ रहा हूँ/रही हूँ।
अहं नगरतः आगच्छामि।	मैं नगर से आ रहा हूँ/रही हूँ।

भवान्/भवती कुत्र गच्छति?	आप कहाँ जा रहे हैं/रही हैं?
भवतु वा इति पश्यामः।	होगा, देखेंगे।
कथं वा?	कैसा है/था/रहा?
कथम् आसीत्?	कैसा था/रहा है?
अङ्गीकृतं किल?	मान लिया क्या?
कति अपेक्षितानि?	कितना चाहिए?
अद्य एव वा?	आज ही क्या?
इदानीम् एव वा?	अभी क्या?
आगन्तव्यं भोः!	आना चाहिए।
तदर्थं वा?	उसके लिए है, क्या?
तत् किमपि मास्तु।	कुछ नहीं चाहिए।
न दृश्यते?	नहीं दिखायी देते हो?
समाप्तं वा?	क्या पूर्ण/सम्पन्न हुआ?
कस्मिन् समये?	कितने बजे?
तथापि........।	फिर भी......
आवश्यकं न आसीत्।	नहीं चाहिए था।
तिष्ठतु भोः!	जरा ठहरिए!
स्मरति किल?	याद है न?
तथा किमपि नास्ति।	वैसी बात नहीं है।
कथम् अस्ति भवान्?	आप कैसे हैं?
न विस्मरतु।	भूलिए मत।
अन्यच्च......	और भी ...

तदनन्तरम्....	उसके बाद ...
तावदेव किल?	उतना ही है न? (वही बात है?)
महान् सन्तोषः।	बहुत अच्छा।
तथा न।	वैसा नहीं।
तस्यः कः अर्थः?	इसके माने? अर्थात्?
आम् भोः!	जी! अच्छा
एवमेव.....	यों ही.....
अहं देवालयं गच्छामि	मैं मंदिर जा रहा/रही हूँ
अहं कार्यालयं गच्छामि।	मैं कार्यालय जा रहा/रही हूँ
अहं विपणिं गच्छामि।	मैं बाजार जा रहा/रही हूँ?
किं चिराद् दर्शनम्?	क्या बात है? बहुत दिनों में दिखायी दिये।
भवन्तं कुत्रापि दृष्टवान्।	आप को कहीं देखा है।
भवान् केन्द्रम् आगतवान् वा?	आप क्या केन्द्र में आये थे?
तर्हि कुत्र दृष्टवान्?	तब कहाँ देखा होगा?
तर्हि तत्रैव दृष्टवान्।	जी, हो सकता है, वहीं देखा होगा।
एतत्सत्यम्	यह सत्य है।

अभ्यासः - संवाद-माध्यमेन वारं वारम् अभ्यासः करणीयः।

सोपानम्-२

व्यवहार - वाक्यानि

समये समागतः।	समय पर आ गये
भवन्तं जानामि।	आपको जानता हूँ।
तथैव अस्तु।	वैसा ही हो।
जानामि भोः।	जानता हूँ।
आम्, तत् सत्यम्।	जी, बहुत अच्छा।
समीचीना सूचना।	बड़ी अच्छी सूचना है।
किञ्चित् एव।	जरा सा/थोड़ा बहुत।
किमर्थं तद् न भवति?	क्यों वह नहीं होता है?
भवतु नाम।	जाने दीजिए।
ओहो! तथा वा?	ओहो! ऐसा भी है क्या?
एवमपि अस्ति वा?	अच्छा! ऐसा भी है क्या?
अथ किम्?	और क्या?
नैव किल!	नहीं तो!
भवतु।	वैसा हो।
आगच्छन्तु। (ब.व.)	आइए।
उपविशन्तु (ब.व.)	बैठिए।
सर्वथा मास्तु।	कृपया नहीं/बिल्कुल नहीं।

अस्तु वा?	क्या ऐसा करें?
चिन्ता मास्तु।	चिन्ता मत करो।
किमर्थं भोः?	किसलिए/क्यों जी?
प्राप्तं किल?	मिला क्या?
प्रयत्नं करोमि।	प्रयास करूँगा/करूँगी।
न शक्यते भोः!	अरे! असंभव है।
तथा न वदतु।	ऐसा मत कहिए।
तत्र कोऽपि सन्देहः नास्ति।	उसमें कोई शंका नहीं है।
तद् अहं न ज्ञातवान्।	मैं वह नहीं जानता।
भवान् कदा ददाति?	आप कब दे रहे हो?
अहं कथं वदामि 'कदा इति'?	मैं कैसे कहूँ, कब?
तथा भवति वा?	वैसा होगा क्या?
समयावकाशः अस्ति वा?	आपको फुरसत है क्या?
अद्य भवतः कार्यक्रमः कः?	आज आपका क्या कार्यक्रम है?
बहुदिनेभ्यः ते परिचिताः।	बहुत दिनों से वे परिचत हैं।
तस्य कियद् धैर्यं/धाष्ट्र्यम्?	उसकी शरारत/ढिठाई तो देखो?
भवान् न उक्तवान् एव।	आप ने तो कहा नहीं।
अहं किं करोमि?	मैं क्या करूँ?
अहं न जानामि।	मैं नहीं जानता।
यथा भवान् इच्छति, तथा।	जैसा आप चाहते हैं, वैसा ही।
भवतु, चिन्तां न करोतु।	ठीक है, चिन्ता मत कीजिए।

तेन किमपि न सिध्यति।	उससे कुछ भी नहीं होता।
सः सर्वथा अप्रयोजकः।	यह तो बिलकुल बेकार है।
पुनरपि एकवारं प्रयत्नं कुर्मः।	फिर एक बार प्रयास करेंगे।
मौनमेव उचितम्।	चुप रहना ही अच्छा है।
तत्र अहं किमपि न वदामि।	उस संबन्ध में मैं कुछ नहीं बोलता हूँ।
तर्हि समीचीनम्	तब तो ठीक है।
एवं चेत् कथम्?	ऐसा हो तो कैसा?
मां किञ्चित् स्मारयतु।	मुझे जरा स्मरण दिलाना।
तम् अहं सम्यक् जानामि।	उसे मैं अच्छी तरह जानता हूँ।
तदानीमेव उक्तवान् किल?	तभी मैंने कह दिया था?
कदा उक्तवान् भोः?	कब कहा?
यत्किमपि भवतु।	चाहे कुछ भी हो।
सः बहु समीचीनः।	वह बड़ा अच्छा है।
सः बहु रूक्षः।	वह बड़ा रूखा है।
तद्विषये चिन्ता मास्तु।	उस बात की चिंता न कीजिए।
तथैव इति न नियमः।	नियम नहीं कि वैसा ही हो।
कर्तुं शक्यम्, किंचित् समयः अपेक्ष्यते।	कर सकते हैं, पर समय चाहिए।
एतावत् अपि कृतवान्।	इतना तो किया।
द्रष्टुम् एव न शक्यते।	देख नहीं सकते।
तत्रैव कुत्रापि स्यात्	वहीं, कहीं होगा।
यथार्थं वदामि।	सच तो कहता हूँ।

एवं भवितुं अर्हति।	ऐसा हो सकता है।
कदाचित् एवमपि स्यात्।	कभी-कभी ऐसा भी हो सकता है।
अहं तावदपि न जानामि वा?	क्या मैं इतना भी नहीं जानता?
तत्र गत्वा किं करोति?	वहाँ जाकर क्या करते हो?
पुनः आगच्छन्तु। (ब.व.)	फिर से आइए।
मम किमपि क्लेशः नास्ति।	मुझे तो कोई कष्ट नहीं।
इदं कष्टं न।	यह मुश्किल नहीं है।
भोः आनीतवान् वा?	लाए हैं क्या?
भवतः कृते कः उक्तवान्?	आप से किसने कहा?
किञ्चिदनन्तरं आगच्छेत्।	कुछ देर से आता होगा।
प्रायः तथा न स्यात्।	प्रायः वैसा नहीं होगा।
चिन्ता मास्तु, श्वः ददातु।	कोई बात नहीं, कल दीजिए।
अहं पुनः सूचयामि।	मैं फिर से बताऊँगा।
अद्य आसीत् वा?	आज था क्या?
अवश्यम् आगच्छामि।	जरूर आऊँगा।
सुरेशः अस्ति वा?	क्या सुरेश जी हैं?
किमर्थम् एवं जातम्?	ऐसा क्यों हुआ?
तत्र आसीत् वा?	क्या वहीं था?
किमपि उक्तवान् वा?	क्या कुछ कहा?
कुतः आनीतवान्?	कहाँ से लाया?
अन्यत् कार्यं किमपि नास्ति।	कोई और काम नहीं।

मम वचनं श्रृणोतु।	मेरी बात सुनिए।
एतत् सत्यं किल?	यह तो सच है न?
तद् अहं अपि जानामि।	वह मैं भी जानता हूँ।
तावद् आवश्यकं न।	उतना जरूरी नहीं।
भवतः का हानिः?	आप का क्या बिगड़ा?
किमर्थम् एतावान् विलम्बः?	क्यों इतनी देर हुई?
यथेष्टम् अस्ति।	पर्याप्त है।
भवतः अभिप्रायः कः?	आपका मतलब क्या है?
अस्य किं कारणम्?	इसका क्या कारण है?
स्वयमेव करोति वा?	स्वयं करोगे क्या?
तत् न रोचते।	वह पसंद नहीं है।
उक्तम् एव वदति सः।	वही रटता रहता है।
अन्यथा बहु कष्टम्।	नहीं तो बहुत कष्ट होगा।
किमर्थं पूर्वं न उक्तवान्?	क्यों पहले ही नहीं कहा?
स्पष्टं न जानामि।	ठीक नहीं जानता।
निश्चयः नास्ति।	अभी निश्चित नहीं है।
कुत्र आसीत् भवान्?	आप कहाँ थे?
भीतिः मास्तु।	डरो मत।
भयस्य कारणं नास्ति।	डर का कारण नहीं है।
तदहं बहु इच्छामि।	मैं उसे बहुत चाहता हूँ।
कियत् लज्जास्पदम्!	कैसा लज्जास्पद है।

सः मम दोषः न।	वह मेरा दोष नहीं है।
मम तु आक्षेपः नास्ति।	मेरा तो आक्षेप नहीं है।
सः शीघ्रकोपी अस्ति।	वह तुनक-मिजाज है।
युक्ते समये आगतवान्।	ठीक समय पर आ गए।
बहु जल्पति भोः!	वह बड़ा बक-बक करता है।
एषा केवलं किंवदन्ती।	यह तो उड़ती खबर है।
किमपि न भवति।	कुछ नहीं होता है।
एवमेव आगतवान्।	ऐसे ही आया।
विना कारणं किमर्थं गन्तव्यम्?	क्यों, यों ही जाना होगा?
भवतः वचनं सत्यम्	आप की बात सही है।
मम वचनं कः शृणोति?	मेरी कौन सुनता है?
तदा तत् न स्फुरितम्!	उस समय कुछ सूझा ही नहीं।
किमर्थं तावती चिन्ता?	क्यों इतनी चिन्ता करते हैं?
भवतः किम् कष्टम् अस्ति?	आप का क्या कष्ट है?
अरे, एवं न भवितव्यं आसीत्।	अरे, ऐसा नहीं होना था।
अन्यथा न चिन्तयतु।	आप गलत न सोचिए।

अभ्यासः - वार्तालाप-माध्यमेन वाक्यानां वारं वारम् अभ्यासः करणीयः।

सोपानम्-३

व्यवहार - वाक्यानि

नैव, अत्रैव सञ्चरामि किल!	नहीं, यहीं आया करता हूँ।
किं भोः, वार्ता एव नास्ति!	अरे, कुछ पता ही नहीं!
किं भोः, एकं पत्रम् अपि नास्ति!	अरे! पत्र तक नहीं लिखा।
वयं सर्वे विस्मृताः वा?	हमें क्या भूल गये?
संकेतम् एव न जानामि स्म।	आप का पता नहीं जानता था।
महाजनः संवृत्तः भवान्!	आप तो बड़े आदमी बन गये हो!
भवान् एव वा! दूरतः न ज्ञातम्।	अरे आप! दूर से तो पहचाना ही नहीं।
ह्यः भवन्तं स्मृतवान्।	कल तुम्हें याद कर रहा था।
कथम् अत्र आगमनम्?	कैसे यहाँ आए?
अत्रैव किञ्चित् कार्यम् अस्ति।	यहीं कुछ काम है।
त्वरितं कार्यम् आसीत्, अतः आगतवान्।	शीघ्रता का काम था, इसलिए आया।
बहुकालतः प्रतीक्षां करोमि।	बड़ी देर से प्रतीक्षा में बैठा हूँ।
पञ्चनिमेशेषु इदं कृत्वा ददामि।	पाँच मिनट में करके देता हूँ।
अद्य सः अत्र नास्ति किल?	आज वह यहाँ नहीं है?
सः एकसप्ताहाभ्यन्तरे आगच्छेत्।	शायद हफ्ते के बाद आएगा।

मम स्वास्थ्यम् समीचीनं नास्ति।	मेरी तबीयत ठीक नहीं है।
महती पादवेदना अस्ति।	पाँव में अत्यधिक पीड़ा है।
किञ्चित् ज्वरः इव	कुछ बुखार जैसा लगता है।
चिकित्सकं पश्यतु।	चिकित्सक से मिलिए।
मम वमनशङ्का।	मुझे उल्टी लगती है।
चिकित्सक-निर्देशनं स्वीकरोतु।	डाक्टर से मिलिए।
किमर्थं कण्ठः अवरुद्धः?	क्यों कंठ बंद है।
अहं अतीव श्रान्तः।	मैं बहुत थक गया हूँ।
तस्य स्वास्थ्यम् कीदृक्?	उसका स्वास्थ्य कैसा है?
अद्य किञ्चित् उत्तमा देहस्थितिः।	आज शरीर कुछ अच्छा है।
प्रातः आरभ्य लघु शिरोवेदना।	सबेरे से सिर में थोड़ी पीड़ा है।
आरोग्यं तावत् सम्यक् नास्ति।	स्वास्थ्य तो अच्छा नहीं है।
चिकित्सकं कदा दृष्टवान्?	डाक्टर से कब मिले?
उत्साहः एवं मास्ति भोः!	उत्साह ही नहीं है।
ह्यः तु स्वस्थः आसीत्।	कल तो ठीक ही था।
किम् अद्य अहं भोजनं करोमि वा?	क्या आज मैं भोजन कर सकता हूँ?
अद्य ज्वरः कथम् अस्ति?	आज बुखार कैसा है?
यथावत्।	वैसा ही है।
यदा कदा उदरवेदना पीडयति किल।	कभी-कभी पेट में दर्द होता है।
ज्वरपीडितः वा? कदा आरम्भ?	क्या बुखार है? कब से?

अहो! रक्तं स्रवति! ओह खून बह रहा है!

सः चिकित्सालये प्रवेशितः। वह अस्पताल में दाखिल है।

मम शिरः भ्रमति इव। मुझे चक्कर जैसा आ रहा है।

कः समयः? क्या बजा है?

सपादचतुर्वादनम् सवा चार बजा है।

त्रिवादने अवश्यं गन्तव्यम् अस्ति। तीन बजे जरूरी जाना है।

पादोनषड्वादने भवान् मिलति वा? क्या पौने छः बजे आप मिलोगे?

सार्धषड्वादने अहं गृहे तिष्ठामि। साढे छः बजे मैं घर पर ही रहता हूँ।

संस्कृतवार्ताप्रसारः प्रातः पञ्चोनसप्तवादने
प्रातः ६.५५ पर संस्कृत में समाचार प्रसारित होते हैं।

सार्धद्विघण्टात्मकः कार्यक्रमः ढाई घण्टे का कार्यक्रम है।

सप्तवादनपर्यन्तं तत्र किं करोति? सात बजे तक वहाँ क्या करते हो?

विद्यालयः दशवादनतः किल? क्या विद्यालय दस बजे से है?

यथेष्टं समयः अस्ति। अभी काफी देर है।

सः षड्वादनतः सप्तवादनपर्यन्तं योगासनं करोति।
वह ६ बजे से ७ बजे तक योगासन करता है।

मम घटी निमेशद्वयं अग्रे सरति। मेरी घड़ी दो मिनट आगे चलती है।

समये आगच्छतु। ठीक समय पर आओ।

अरे! दशवादनम्! अरे दस बज गये!

इदानीं यथार्थः समयः कः? इस समय ठीक समय क्या है?

किमर्थम् एतावान् विलम्बः? क्यों इतनी देर की?

इदानीं भवतः समयावकाशः अस्ति वा?	क्या अब आप के पास समय है?
रविवासरे कः दिनाङ्कः?	रविवार किस तारीख को है?
रविवासरे चतुर्विंशतितमदिनाङ्कः।	रविवार चौबीस तारीख को है।
पञ्चदशदिनाङ्के कः वासरः?	पन्द्रहवीं तारीख को क्या वार है?
भवतः पाठशाला कदा आरब्धा?	तुम लोगों का विद्यालय कब खुला?
जुलाईमासस्य प्रथमे दिनाङ्केः।	जुलाई की पहली तारीख को खुला।
भवतः जन्मदिनाङ्कः कः?	आपकी जन्मतिथि क्या है?
दश-एकादश-नवदशोत्तर-द्विषष्टिः।	दस नवम्बर उन्नीस सौ बासठ।
मम लेखनीं स्वीकृतवान् वा?	क्या मेरी पेन उठा ली?
पिता अस्ति, तूष्णीम् उपविशतु।	पिताजी हैं, चुप रहो।
कृपया मनसि पठतु।	कृपया मन में पढ़ लो।
भगिनि! मम कृते गणितं पाठयति वा?	बहन! क्या मुझे गणित पढ़ाओगी?
मम शिक्षकः एवम् एव पाठितवान्।	मेरे शिक्षक ने ऐसा ही पढ़ाया है।
भवतः लेखनी कुत्र?	तुम्हारी (कलम) पेन कहाँ है?
मम छत्रं भवान् किमर्थं स्वीकृतवान्?	तुमने मेरी छतरी क्यों ली है?
तस्य कृते किमर्थं दत्तवान्?	उसे क्यों दिया?
न, अहं पितरं सूचयामि।	नहीं, मैं पिताजी से कहूँगा।

अभ्यासः- संवाद-माध्यमेन एतेषां वाक्यानां वारंवारम् अभ्यासः करणीयः।

सोपानम्-४

व्यवहारवाक्यानि

पठनं नास्ति, किमपि नास्ति, केवलम् अटति।

पढ़ता-वढ़ता नहीं, यों ही घूमा करता है।

भवतः विषये सर्वम् अहं जानामि।	अरे आपको तो खूब जानता हूँ।
भवती बहु पठति, जानामि।	आप खूब पढ़ती हो! मैं जानता हूँ।
अद्य भवतः मित्रम् मार्गे मिलितः।	आज आपका मित्र रास्ते में मिला था।
भवतः मित्रम् अहं मिलितवान्।	मैं आपके मित्र से मिला था।
सः किमपि उक्तवान् वा?	क्या उसने कुछ कहा?
परीक्षा कदा इति स्मरति किल?	याद है न, परीक्षा कब होगी?
मोहनः भवन्तं आह्वयति।	मोहन आपको आवाज दे रहा है।
पश्यतु, नासिका स्रवति।	देख लो, नाक बह रही है।
नासिका स्वच्छं कृत्वा आगच्छतु।	नाक साफ करके आओ।
वक्तव्यम् आसीत्, करोमि एव।	कह देते, मैं कर देती/देता ।
अङ्कन्या मास्तु, लेखन्या लिखतु।	पेंसिल से नहीं, पेन से लिखो।
तिष्ठतु, युतकं परिवर्त्य आगच्छामि।	जरा ठहरो, कपड़ा बदल कर आता हूँ
इदं युतकं बहु सम्पृक्तम्।	यह कमीज बहुत कसी हुई है।
अपरं युतकं एवम् नास्ति।	दूसरी कमीज ऐसी नहीं है।
उन्नत्याम् उभावपि समानौ।	दोनों की ऊँचाई बराबर है।

अस्माकं गृहे सर्वे स्वस्थाः।	हमारे घर में सब स्वस्थ हैं।
मशको मशकः!	अरे मच्छर ही मच्छर हैं।
मशकजालः कुत्र?	मच्छरदानी कहाँ है?
अन्तः कोऽपि नास्ति वा?	क्या अन्दर कोई नहीं है?
दूषितः कालः।	अरे समय खराब है।
कर्मकराः एव दुर्लभाः।	काम करने वाले ही नहीं मिलते।
पानीयं किं ददामि?	क्या पिलाया जाय?
तर्हि पानकं आनयामि।	तो पेय लाता हूँ।
भवान् काफीं पिबति उत चायम्?	आप कॉफी पीओगे या चाय?
किञ्चित् विश्रान्तिम् अनुभवतु।	जरा आराम कर लीजिए।
अद्यैव गन्तव्यं वा?	क्या, आज ही जाना है?
भोजनान्तरं गच्छतु।	भोजन करके जाना।
दिनद्वयं तिष्ठतु भोः!	अरे, दो दिन ठहर जाओ!
रात्रौ निद्रा सम्यक् आसीत्?	रात को नींद अच्छी आयी है!
रात्रौ निद्रा एव नास्ति भोः!	रात भर नींद नहीं आयी।
बहिः गतवान्, इदानीं आगच्छति।	यहीं कहीं गया है, अभी आ जाता है।
तत्र गत्वा किम् करोति?	वहाँ जा कर क्या करता है?
किम् कारणम्?	क्या कारण है?
पर्याप्तम्।	बहुत है।

शुभकामनाः

भवद्भ्यः/भवतीभ्यः शुभकामनाः आपके लिए शुभकामनाएँ हैं।

शुभमस्तु शुभ हो।

भूयात्सर्वं सुमङ्गलम् सब कुछ मंगलमय हो।

नववर्षं मङ्गलं भूयात् नववर्ष मंगलमय हो।

दीपावल्याः शुभाशयाः दीपावली की हार्दिक शुभकामनाएँ।

मकरसङ्क्रान्तेः/पोङ्गलस्य शुभाशयाः।
मकरसंक्रान्ति/पोंगल की हार्दिक शुभकामनाएँ।

नववर्षस्य शुभकामनाः नव वर्ष की शुभकामनाएँ ।

भवतः वैवाहिकजीवनं शुभमयं भवतु।
आपका वैवाहिकजीवन सुखपूर्ण हो।

नवदम्पत्योः वैवाहिकजीवनं सुमधुरं/सुखदं भूयात्।
नवदम्पती का जीवन सुखद/समृद्धशाली हो।

सफलतायै अभिनन्दनम्। आप की सफलता पर बधाइयाँ।

भवदीयः समारोहः यशोदः भवतु।
आप का समारोह यश प्रदान करने वाला हो।

शतं जीव शरदो वर्धमानः।
सौ वर्षों तक उन्नति को प्राप्त करते हुए जीओ।

शिवाः ते सन्तु पन्थानः। आप की यात्रा शुभ हो।

शुभास्ते पन्थानः आपकी यात्रा शुभ हो।

सर्वे भवन्तु सुखिनः सभी सुखी हों।

जन्मदिनस्य मङ्गलकामनाः	जन्मदिन की मंगलकामनाएँ हैं।
सर्वे कुर्वन्तु ते मङ्गलम्	सब तुम्हारा मंगल करें।
यशस्वी भव (पुँ)	यश प्राप्त करो।
यशस्विनी भव (स्त्री.)	यश प्राप्त करो।
चिरञ्जीविनी भव (स्त्री.)	दीर्घायु प्राप्त करो।
चिरञ्जीवी भव (पुँ.)	दीर्घायु प्राप्त करो।
आयुष्मती भव (स्त्री.)	तुम्हारी दीर्घायु हो
आयुष्मान् (पुँ) भव	तुम्हारी दीर्घायु हो।
वर्द्धापनम्	बधाई।

<u>**अभ्यासः**</u>- वार्तालाप-माध्यमेन एतेषां वाक्यानां वारंवारम् अभ्यासः करणीयः।

सोपानम् – ५

अव्यय-शब्दाः

अहो – आश्चर्य
अद्य – आज
आम् – हाँ
अस्तु – हाँ/अच्छा
अग्रतः – आगे (सामने)
अग्रे – पहले
अचिरम्– जल्दी
अन्तर् – भीतर
अतः – इसलिए
अतीव – बहुत
अत्र – यहाँ
अथ – बाद में
अथ किम्– और क्या
अधः – नीचे
अन्यच्च– और भी
अभितः– चारों ओर
अमुत्र – वहाँ
अलम् – बस
अपि – भी
अधुना – आजकल
इतः – इधर से

एवमेव – ऐसा ही
एकदा – एक बार
एकत्र – एक स्थान पर
ओम् – हाँ
कथम् – कैसा, कैसे
कदाचित्– कभी
किम् – क्या
किमु – प्रश्न (क्या)
किल – सचमुच
कति – कितना
किञ्चित्– थोड़ा
किन्तु – फिर भी
किमुत – कहाँ तो
कुतः – कहाँ से
कुत्र – कहाँ
क्व – कहाँ
क्वचित् – कहीं
किमर्थम् – किसलिए
खलु – अवश्य
च – और
चिरम् – देर

नो – नहीं
नक्तम् – रात
परमम् – बाद में
प्रायः – अक्सर
प्रातः – सबेरा
पुरा – बहुत पहले
परश्वः – आने वाला परसों
पुर्वेद्युः – विगत दिन
परेद्युः – आने वाले दिन
पुरस्तात् – सामने
पुनः – फिर
पश्चात् – बाद में
बहिः – बाहर
बलात् – जबरदस्ती
वृथा – व्यर्थ
मनाक् – थोड़ा
मिथः – आपस में
यतः – जहाँ से
यथा – जैसे, जैसा

इतस्ततः	इधर/इधर से	**चेत्**	यदि	**यत्र**	जहाँ
अपरम्	और भी	**जातु**	कभी	**यावत्**	जब तक/ उतना
अपरेद्युः	दूसरे दिन	**झटिति**	झट से	**यत्**	कि
इतरेद्युः	अन्य दिन	**तथा**	वैसा	**यदि**	यदि
इति	समाप्ति	**तावत्**	उतना	**यथार्थम्**	सत्य
दिवा	दिन में	**तत्र**	वहाँ	**यथायोग्यम्**	उचित
इदानीम्	इस समय	**ततः**	वहाँ से	**यदा**	जब
इह	यहाँ	**अथवा**	या	**तर्हि**	तो
उच्चैः	ऊँचा	**धिक्**	धिक्कार	**वा**	अथवा
उभयतः	दोनों और से	**निकषा**	निकट	**सर्वतः**	सब जगह
एवम्	ऐसा	**नाना**	बहुत	**वरम्**	अच्छा
स्वयम्	अपने आप	**नहि**	नहीं	**शनैः**	धीरे
सायम्	शाम को	**नो चेत्**	नहीं तो	**सुष्ठु**	बहुत अच्छा
सह	साथ	**सद्यः**	अभी	**घृणायाम्**	किम्, धिक्
सहसा	अचानक	**समन्ततः**	चारों ओर	**शोके**	हा, हन्त
श्वः	आने वाला कल	**सम्प्रति**	अब	**क्रोधे**	हुम्,
सर्वदा	हमेशा	**ह्यः**	बीता कल	**सम्बोधने**	हे, भोः, अरे, अये, अयि ओ!
साक्षात्	प्रत्यक्ष	**हि**	ही		
सकृत्	एक बार	**स्वस्ति**	कल्याण		

अभ्यास :–

१. अद्य सोमवासरः अस्ति।

२. अहम् अत्र पठामि।

३. बालः अपि खेलति।

४. इदानीम् मेघाः गर्जन्ति।

५. गजः शनैः चलति।

६. यदि भवान् पठति तर्हि अहम् अपि पठामि।

७. सम्प्रति वयम् चलामः।

८. सुधा सायम् किम् करोति?

सोपानम् - ६

उत्तमपुरुषः

(एकवचनम्)

भवान् किम् करोति ?

अहम् धावामि।

त्वम् किम् करोषि ?

अहम् खादामि।

अहम् क्रीडामि। त्वम् किम करोषि ? **अहम् नमामि।**

अहम् वदामि।

अहम् चरामि।

अहम् (सुरेशः) धावामि। **त्वम् (सुभद्रा) किम् करोषि ?**

अहम् (सुभद्रा) खादामि।

अहम् (स्वयम्) एव लिखामि।

अहम् अपि तत्र चरामि।

अहम् न धावामि। **किम् त्वम् क्रीडसि ?**

अहम् न क्रीडामि।

अहम् न वदामि। **किम् त्वम् लिखसि ?**

अहम् न लिखामि।

अहम् न खादामि। **किम् त्वम् पठसि ?** **अहम् पठामि।**

शब्दकोशः

भवान् (सर्व.) आप

त्वम् (सर्व.) तू

अहम्-(सर्व.) मैं।

नम्-(धा.प.) नमन करना

पठ्-(धा.प.) पढ़ना

लिख्-(धा.प.), लिखना

पा (पिब्)-(धा.प.) पीना

धाव्-(धा.प.), दौड़ना

खाद्-(धा.प.) खाना

क्रीड्-(धा.प.) खेलना

वद्-(धा.प.), बोलना

किम् -(अ.) क्या

एव - (अ.) ही

तत्र - (अ.) वहाँ

पच्-(धा.प.), भी

अपि-(अ.) किन्तु

स्वयम्-(अ.) स्वयम् (खुद)

न-(अ.) नहीं,

सुरेशः, सुभद्रा (सं.)

अभ्यास :

लेखनम्—निम्नलिखित धातुओं का अभ्यास करिए—

यथा -

(क) अहम् लिखामि। ....

क्रीड्, पठ्, धाव्, चर्, वद्।

(ख) अहम् पठामि। ....

पा (पिब्), पठ्, नम्, खाद्, पच्।

धा. = धातुः

प. = परस्मैपदी

अ. = अव्यय

सं. = संज्ञा

सर्व. = सर्वनाम

सोपानम्-७

उत्तमपुरुषः

(द्विवचनम्)

भवन्तौ प्रातः किम् कुरुतः ?

आवाम् प्रातः पठावः।

युवां प्रातः किम् कुरुथः ?

आवाम् बहिः भ्रमावः।

युवाम् अधुना किम् कुरुथः ?

आवाम् अधुना लिखावः।

युवाम् सायं किम् कुरुथः ?

आवाम् सायं क्रीडावः।

आवाम् अपि पिबावः। **आवाम् नमावः।**

आवाम् (अहम् प्रत्यूषः प्रफुल्लः च) गच्छावः।

आवाम् (अहम् सुलेखा, सुभद्रा च) हसावः।

आवाम् (अहम् रमणः रमेशः च) धावावः।

आवाम् पठावः।

आवाम् स्वयम् एव लिखावः। आवाम् तत्र भ्रमावः।

युवाम् कुत्र भ्रमथः ?

आवाम् अपि तत्र भ्रमावः।

आवाम् तत्र न गच्छाव:। **किम् युवाम् उच्चै: हसाव: ?**

आवाम् उच्चै: न हसाव:।

आवाम् अपि न गच्छाव:।

आवाम् अधुना न चलाव:। **किम् युवाम् अत्र क्रीडाव: ?**

आवाम् अत्र न क्रीडाव:।

शब्दकोश:

भवन्तौ – (सर्व.) आप दोनों

आवाम्–(सर्व.) हम दोनों

युवाम् (सर्व.) तुम दोनों

भ्रम्–(धा.प.) फिरना, टहलना

हस्–(धा.प.) हँसना

चल् –(धा.प.) चलना

गम् – (गच्छ् धा.प.) जाना

बहि:–(अ.) बाहर

प्रात: – (अ.) सुबह

तत्र – (अ.) वहाँ

अत्र – (अ.) यहाँ

अधुना – (अ.) अभी

उच्चै: –(अ.) ऊँचे स्वर से

सायम् – (अ.) शाम को

अभ्यास:

(क) **निम्नलिखित धातुओं से वाक्य बनाइए।** यथा–आवाम् लिखाव:।

चल्, हस्, लिख्, नम्, चर, वद्

(ख) **खाली स्थान भरिए** –

१.आवाम् .... ५. ....खादामि।

२.अहम्............................. ६. ....पठाव:।

३.आवाम् ....७. ....लिखामि।

४.अहम् .... ८. .... क्रीडाव:।

सोपानम्-८

उत्तमपुरुषः

(बहुवचनम्)

भवन्तः प्रातः किम् कुर्वन्ति ?

वयम् प्रातः धावामः।

यूयम् प्रातः किम् कुरुथ ?

वयम् प्रातः पठामः।

वयम् बहिः भ्रमामः। यूयम् अधुना किम् कुरुथ ?

वयम् अधुना खादामः। यूयम् सायं किम् कुरुथ ?

वयम् सायं क्रीडामः। **वयम् नमामः।**

वयम् (अहम् प्रत्यूषः प्रफुल्लः प्रदीपः च) पठामः

वयम् (अहम् सुलेखा सुभद्रा सुषमा च) भ्रमामः।

वयम् (अहम् रमेशः रमणः राजीवः च) धावामः।

वयम् अपि पठामः।

वयम् स्वयम् एव लिखामः। **यूयम् किम् कुरुथ ?**

वयम् अत्रापि (अत्र+अपि) खादामः।

वयम् उच्चैः पठामः। **किम् यूयम् उच्चैः पठथ ?**

वयम् शनैः पठामः।

वयम् शीघ्रम् गच्छामः। **किम् यूयम् गच्छथ ?**

वयम् अत्र न गच्छामः।

वयम् तत्र न गच्छामः। **किम् यूयम् क्रीडथ ?**

वयम् अधुना न क्रीडामः।

वयम् अपि न लिखामः। **किम् यूयम् भ्रमथ ?**

वयम् अत्र न भ्रमामः। **किम् यूयम् शनैः धावथ ?**

वयम् शनैः न धावामः।

शब्दकोशः

भवन्तः – (सर्व.) आप सब

यूयम् – (सर्व.) तुम सब

वयम् – (सर्व.) हम सब

अट् – (धा.प.) घूमना

प्रत्यूषः, प्रफुल्ल, सुभद्रा, सुरेखा (सं.)

शीघ्रम् – (अ.) जल्दी से,

शनैः – (अ.) धीरे

अभ्यास :

(क) **निम्न धातुओं से वाक्य बनाइए**

यथा – वयम् पठामः।

हस्, लिख्, चल्, क्रीड्, नम्

(ख) **निम्नलिखित में सही मिलान कीजिए –**

अहम्	अपि	गच्छावः।
वयम्	तत्र	नमावः।

आवाम्	न	पठामः।
वयम्	अत्र	धावामि।

<u>लेखनम् -</u>

(क) **समझिए और प्रयोग करिए-**

अधुना, तत्र, अपि, नमावः, एव ।

(ख) **सही प्रयोग करिए-**

(१) अहम् ....(नम्)

(२) वयम्..................(पच्)

(३) आवाम्................(खाद्)

(४) वयम्.........(हस्)

(५) आवाम्.......(लिख्)

(६) अहम् ....(वद्)

(ग) **प्रयोग करिए-**

पा-पिब्, गम्-गच्छ्, स्था-तिष्ठ्, सिच्-सिञ्च्, घ्रा-जिघ्र्।

सोपानम्–९

मध्यमपुरुषः

(एकवचनम्)

त्वम् बालकः। **त्वम् कः** ? अहम् बालकः।

त्वम् बालिका। **त्वम् का** ? अहम् बालिका।

अहम् सुलेखा।

त्वम् गणेशः। **त्वम् कः ?**

अहम प्रदीपः।

त्वम् मृदुला। **त्वम् का ?**

अहम् सुमेधा

त्वम् धावसि।

त्वम् लिखसि।

त्वम् सिञ्चसि।

त्वम् रक्षसि।

त्वम् पतसि।

त्वम् पिबसि। त्वम् खादसि।

त्वम् उच्चैः पठसि। अहम् उच्चैः न पठामि।

अहम् तूष्णीम् पठामि।

त्वम् अधुना आगच्छसि।

त्वम् कदा आगच्छसि ?

अहम् अधुना आगच्छामि।

त्वम् तत्र नृत्यसि।

वयम् क्रीडामः नृत्यामः च।

शब्दकोष:

त्वम् – (सर्व.) तुम,

सिच् – (सिञ्च्) (धा.प.)

रक्ष् – (धा.प.) रक्षण करना।

गै – (गाय्) (धा.प.) गाना,

पत् – (धा.प.) पड़ना, गिरना

नृत् (धा.प.) नृत्य करना

तूष्णीम् (अ.) मौन

किन्तु (अ.) परंतु

आ + गम् (आगच्छ्) आना

अभ्यास:

(क) **वाक्य पूरा करो** –

.... पठामः। .... पठावः।

.... लिखसि। .... लिखामः।

.... क्रीडामि। .... गच्छसि।

.... सिञ्चावः। .... रक्षसि।

(१) त्वम् ....(सिञ्च्) ....

(२) त्वम् ....(पठ्) ....

(३) त्वम् ....(हस्) ....

(४) त्वम् ....(चल्) ....

लेखनम्–

(अ) **वाक्य बनाइए** –

उच्चैः, शनैः, तूष्णीम्, किन्तु

सोपानम्-१०

मध्यमपुरुषः

(द्विवचनम्)

युवाम् बालौ।

युवाम् बाले।

युवाम् नमथः।

युवाम् आगच्छथः।

युवाम् कदा गायथः? आवाम् सायं गायावः।

युवाम् चरथः।

युवाम् कुत्र गच्छथः? आवाम् गृहम् गच्छावः।

युवाम् (त्वम् रमेशः रमणः च) क्रीडथः।

युवाम् (त्वम् सरला सुभद्रा च) गायथः।

युवाम् (त्वम् राजीवः संजीवः च) भजथः। युवाम् खादथः।

युवाम् आगच्छथः लिखथः च।

यदा आवाम् पठावः तदा युवाम् किम् कुरुथ?

यदा युवाम् पठथः तदा आवाम् क्रीडावः।

युवाम् पचथः। आवाम् खादावः।

युवाम् तदा पठथः। आवाम् अधुना पठावः।

युवाम् गच्छथः। आवाम् आगच्छावः।

युवाम् कदा भजथः। आवाम् प्रातः भजावः।

युवाम् उच्चैः वदथः। आवाम् शनैः वदावः।

यावत् युवाम् तिष्ठथः, तावत् आवाम् चलावः।

यावत् युवाम् भ्रमथः, तावत् आवाम् धावावः।

शब्दकोशः –

युवाम् (सर्व.) – तुम दोनों

भज् (धा.उ.प.) –भजना

बालौ – (पुं.द्वि व.) –दो बालक

बाले – (स्त्री.द्वि व.) –दो बालिकाएँ

दा (यच्छ् धा.प.) –देना

सदा (अ.) –नित्य

यावत् (अ.) –जब तक

तदा (अ.) –तब

उप+विश्, – (धा. प.) –बैठना

तावत् (अ.) –तब तक

स्था (तिष्ठ्) (धा.प.) –रहना

क्रीड् (धा. प.) –खेलना

क्वचित् (अ.) –कहीं, कभी–कभी

अभ्यासः

वाक्य बनाइए–यथा–युवाम् लिखथः।

त्वम् (रमणः) लिखसि । त्वम् (रमेशः) अपि ....।

(१) युवाम् (क्रीड्)

(२) युवाम् (नम्)

(३) युवाम् (गच्छ्)

(४) युवाम् (खाद्)

(५) युवाम् (भज्)

(६) युवाम् (चल्)

लेखनम् –

(अ) **कोष्ठक से सही क्रिया लिखिए** –

(१) आवाम् .... (लिखथ, लिखावः।)

(२) अहम् .... (पचसि, पचामि।)

(३) त्वम् .... (नमामि, नमसि।)

(४) युवाम् .... (भ्रमथः, भ्रमावः।)

(५) वयम् .... (क्रीडथः क्रीडामः।)

उ.प. = उभयपदी

सोपानम् -११

मध्यमपुरुषः

(बहुवचनम्)

यूयम् (त्वम् रमेशः रमणः राजेन्द्रः च) आगच्छथ।

यूयम् (त्वम् सरला सुभद्रा सविता च) पश्यथ।

यूयम् (त्वम् प्रफुल्लः प्रत्यूषः प्रदीपः च) भजथ।

यूयम् (त्वम् तारा लता भद्रा च) नमथ।

यूयम् किम् खादथ? वयम् फलम् खादामः।

यूयम् किम् लिखथ? वयम् संस्कृतम् लिखामः।

यूयम् कुत्र भ्रमथ? वयम् अत्र भ्रमामः।

यूयम् कदा पठथ? वयम् सायं पठामः।

यूयम् किम् न वदथ? वयम् असत्यम् न वदामः।

यूयम् शनैः चलथ।

यूयम् पिबथ।

यूयम् उच्चैः गायथ।

यूयम् प्रातः भ्रमथ।

यूयम् बहिः गच्छथ।

यूयम् खादथ।

यूयम् पचथ। वयम् खादामः।

यदा यूयम् गच्छथ तदा वयम् आगच्छामः।

यूयम् शीघ्रम् पठथ, किन्तु वयम् शनैः पठामः।

यूयम् यदा क्रीडथ, वयम् तदा अटामः

यदा यूयम् गच्छथ, तदा वयम् आगच्छामः।

यूयम् धावथ, किन्तु वयम् चलामः।

शब्दकोशः-

यूयम् (सर्व.)-तुम सब।

दृश् (पश्य-धा.प.)-देखना **प्र+विश्** (धा.प.)-प्रवेश करना

नी (नय्-धा.प.)-ले जाना

आ+नी (**आ**+नय् **धा.प.**)-लाना **कुत्र** (अ.)-कहाँ

कदा (अ.)-कब

अभ्यासः

(क) **निम्नलिखित से वाक्य बनाइए** -

यथा - त्वम् नमसि। युवाम् नमथः। यूयम् नमथ।

त्वम्, युवाम्, यूयम्, पच्, लिख्, हस्, क्रीड्, वद्, गम् (गच्छ्)

(ख) **प्रयोग कीजिए** -

(१) अहम् अत्र .... (आ+गम्)

(२) आवाम् तत्र .... (नम्)

(३) वयम् अपि .... (नी)

(४) आवाम् सदा .... (नम्)

(५) वयम् तत्र .... (चल्)

(६) वयम् अत्र .... (स्था-तिष्ठ्)

(ग) **निम्नलिखित में सही मिलान कीजिए -**

अहम्	पठावः	तत्र
वयम्	चलसि	अत्र
त्वम्	आगच्छामि	कुत्र
यूयम्	नमथः	अपि
आवाम्	गायामः	न
युवाम्	नयथ	सदा

सोपानम् -१२

प्रथमपुरुषः

(पुँल्लिंग-एकवचनम्)

अशोकः नमति। **सः किम् करोति** ? सः नमति।

रमेशः गच्छति। **सः किम् करोति** ? सः गच्छति।

जवाहरः क्रीडति । **सः किम् करोति** ? सः क्रीडति।

बालः धावति। **सः किम् करोति** ? सः धावति।

चन्द्रकान्तः नृत्यति। **सः किम् करोति** ? सः नृत्यति।

सः उपविशति। **सः लिखति।**

सः सदा पठति।

सः किम् खादति? सः आम्रम् खादति

सः कदा आगच्छति? सः प्रातः आगच्छति

सः अपि क्रीडति।

कः कूजति? कोकिलः तत्र कूजति।

तत्र श्यामः तिष्ठति। **सः कुत्र तिष्ठति** ? सः तत्र तिष्ठति।

यदा सः गच्छति, तदा अहम् अपि गच्छामि।

यावत् सः क्रीडति तावत् अहम् अपि क्रीडामि।

यावत् सः धावति। तावत् अहम् अपि धावामि।

यदा सिंहः गर्जति, तदा वयम् तूष्णीम् तिष्ठामः।

यदा शुकः वदति, तदा त्वम् नृत्यसि।

शब्दकोशः–

सः (सर्व.–पुँ॰)–वह

गर्ज् (धा.प.)–गरजना

कोकिलः (पुँ॰)–कोयल

सिंहः (पुँ॰)–शेर

कूज् (धा.प.)–कूजन करना

शुकः (पुँ॰)–तोता

भू (भव्–धा.प.)–होना

कदा (अ.)–कब

अभ्यास :

(क) बालः, कोकिलः, रमेशः, रमणः, राधा– **इनके साथ निम्न धातुओं का प्रयोग कीजिए**–

नृत्, गै (गाय्), पा (पिब्), नी (नय्) दा (यच्छ्)।

(ख) **लिखिए और उच्चारण कीजिए** –

१. अहम् तत्र गच्छामि। वयम् अत्र गच्छामः।

२. त्वम् अत्र पठसि। युवाम् अपि पठथः।

३. आवाम् पिबावः। युवाम् अपि पिबथः।

४. अहम् नमामि। सः अपि नमति।

५. अहम् नृत्यामि। सः अपि नृत्यति।

६. सिंहः गर्जति। लता धावति।

प्रयोगः लेखनम् च –

(क) **सही क्रिया लिखिए** –

अहम् .... (पठ्) आवाम् .... (स्था–तिष्ठ्)

वयम्................ (नृत्)

सः .... (धाव्) यूयम्............ (भू–भव्)

(पुं.) पुँलिंग। (स्त्री.) स्त्रीलिंग। (नपुं.)नपुंसकलिंग।

सोपानम् -१३

प्रथमपुरुषः

(पुँल्लिंग-द्विवचनम्)

श्यामः रामः च किम् कुरुतः? श्यामः रामः च खेलतः

सुधा लता च सदा खेलतः।

रमेशः रमणः च कुत्र क्षिपतः?

तौ तत्र क्षिपतः।

तौ तत्र धावतः। **तौ उपविशतः**

अश्वः गजः च तत्र धावतः।

तौ कदा कूजतः?

शुकः पिकः च प्रातः कूजतः।

तौ कदा गुञ्जतः?

भ्रमरः मक्षिका च सायं गुञ्जतः।

तौ कदा भषतः?

कुक्कुरौः नक्तम् भषतः गर्दभः च चीत्कारम् करोति।

तौ तिष्ठतः

शुकः पिकः च क्वचित् कूजतः।

कुक्कुरः अश्वः च अधुना धावतः।

वानरः हरिणः च सायम् उत्पततः।

सिंहः व्याघ्रः च नक्तम् गर्जतः।

चक्रवाकः चक्रवाकी च आक्रोशतः।

यदा रमेशः खादति तदा सुरेशः पिबति।

यावत् वसन्तः सरला च क्रीडतः तावत् सुधा लता च नृत्यतः।

यत्र सिंहः भ्रमति तत्र मनुष्यः न वसति।

यत्र हरिणौ चरतः तत्र बालौ क्रीडतः।

शब्दकोशः–

तौ (सर्व.पुँ०) = दोनों

अश्वः (पुँ०) = घोड़ा

गुञ्ज् (धा. प.)–गुनगुनाना

मक्षिका (स्त्री.)–मक्खी

नक्तम् (अ.)–रात में

चीत्कारः (पुँ०)–चिल्लाना

खेल् (धा.प.)–खेलना

उद् +पत् (धा.प.)–कूदना

क्षिप् (धा.प.)–फेंकना

पिकः (पुँ०)=कोकिल

भ्रमरः (पुँ०)–भौंरा

भष् (धा.प.)–भौंकना

गर्दभः (पुँ०)–गधा

कृ (धा.प.) = करना,

हरिणः–(पुँ०)–मृग

व्याघ्रः (पुँ०)–बाघ

चक्रवाकः (पुँ०)=एक पक्षीका नाम **चक्रवाकी** (स्त्री.)

वानरः (पुँ०)–बन्दर

कुक्कुरः (पुँ०)–कुत्ता

आ+क्रुश् (धा.प.)–रोना

गजः (पुँ०)–हाथी

वस् (धा.प.)–निवास करना

अभ्यासः

(क) तौ, बालौ, बाले, शुकौ, सिंहौ, कुक्कुरौ–**के साथ निम्न धातुओं का प्रयोग कीजिए**–

गम् (गच्छ्), पच्, कूज्, भष्, गर्ज्, क्षिप्।

ख) **वाक्य बनाइए** –

(१)..................लिखतः। (५) ....नमसि।

(२)..................कूजथ। (६) ....गायतः।

(३) ....गुञ्जन्ति। (७)...................यच्छथः।

(४) ....तिष्ठावः। (८) ....आगच्छति।

लेखनम्–

क) **लिखिए और उच्चारण कीजिए**

सायं, प्रातः, उच्चैः, तौ, सः, नक्तम्, च, कदा, तत्र, कुत्र

सोपानम्-१४

प्रथमपुरुषः

(पुँल्लिंग-बहुचनम्)

ामः कृष्णः गोपालः च क्रीडन्ति । **ते किम् कुर्वन्ति ?** ते क्रीडन्ति ।

ः कुत्र पठति ? स: अत्र पठति ।

ौ कुत्र पठतः । तौ अत्र पठतः ।

किम् कुर्वन्ति ?

अपि पठन्ति । **ते उपविशन्ति**

ीनः मकरः कच्छपः च तरन्ति । **ते किम् कुर्वन्ति ?** ते तिष्ठन्ति । **ते तरन्ति ।**

ोभा रमा प्रभा च नृत्यन्ति । **ते किम् कुर्वन्ति ?** ते नृत्यन्ति ।

ुकः कपोतः पिकः च कूजन्ति । **ते किम् कुर्वन्ति ?** ते कूजन्ति ।

दा सिंहाः गर्जन्ति तदा मृगाः धावन्ति ।

त्र नराः वसन्ति तत्र कुक्कुराः अपि वसन्ति ।

त्र वृक्षः तिष्ठति तत्र छाया भवति ।

त्र कृषकः कृषति तत्र वृषभौ अपि चलतः ।

दा गजः गच्छति तदा कुक्कुराः भषन्ति ।

श्वः शीघ्रम् धावति । वृषभाः शनैः चलन्ति ।

सिंहाः स्वैरं भ्रमन्ति । गजाः अपि स्वैरं भ्रमन्ति ।

ृक्षः सदा तिष्ठति । नदी सदा वहति ।

शब्दकोश-

ते (सर्व.पुँ०ब.व.) - वे सब

तृ तर् (धा.प.) - तैरना

मीनः (पुँ०) - मछली

मकरः (पुँ०) - मगरमच्छ

कच्छपः (पुँ०) - कछुआ

वृक्षः (पुँ०) - पेड़

छाया (स्त्री.) - छाया

कृषकः (पुँ०) - किसान

कृष् (धा.प.) - जोतना

वृषभः (वृषः) (पुँ०) - बैल

स्वैरम् (अ.) - इच्छानुसार

वह् (धा.प.) - बहना

नदी (स्त्री.) - नदी

कपोतः (पुँ०) - कबूतर

(क) **निम्न धातुओं से वाक्य बनाइए**

यथा- 'ते चरन्ति'

कूज्, स्था (तिष्ठ्) कृष्, तृ (तर्)

लेखनम्

(ख) **लिखिए और उच्चारण करिए**-

सः खादति। सः क्रीडति। सः खादति क्रीडति च।

(१) सः पठति। सः लिखति। ते लिखन्ति।

(२) सः भ्रमति। ते धावन्ति।

(३) रमेशः वदति। रमेशः हसति। बालकाः हसन्ति।

(४) शुकः वदति। मयूरः नृत्यति। शुकाः वदन्ति।

ए.व. = एकवचनम्

द्वि.व.= द्विवचनम्

ब.व. = बहुवचनम्

सोपानम्-१५

प्रथमपुरुषः

(स्त्रीलिंग-एकवचनम्)

सुभद्रा लिखति। **सुभद्रा किम् करोति?** सा लिखति।

प्रभा गायति। **प्रभा किम् करोति?** सा गायति।

लता पतति। **लता कुत्र पतति?** सा तत्र पतति।

सा तत्र नृत्यति। **सा गायति।**

रमा हसति। **रमा किम् करोति?** सा हसति।

शाखा विलसति। सा विलसति। का पठति, **का न पठति?**

राधा पठति, दिशा न पठति। का लिखति **का च हसति?**

सुभद्रा लिखति, किन्तु प्रभा हसति।

रमा अत्र धावति। शोभा तत्र तिष्ठति।

लता खादति। पद्मा पचति।

गंगा गच्छति। यमुना आगच्छति।

<u>वार्तालापः</u>-

सुभद्रा –त्वम् कुत्र गच्छसि?

प्राची – अहम् तत्र गच्छामि, यत्र त्वम् गच्छसि।

सुभद्रा – तत्र त्वम् पठसि किम्?

प्राची– अहम् तत्र न पठामि, किन्तु तत्र क्रीडामि।

सुभद्रा – किम् रमा अपि क्रीडति?

प्राची – आम् ! सा अपि क्रीडति।

सुभद्रा – किम् सुलेखा तत्र गच्छति ?

प्राची – सुलेखा अपि तत्र गच्छति।

सुभद्रा – विभा कुत्र धावति ?

प्राची– विभा अपि तत्र धावति।

शब्दकोश :–

सा (स्त्री. सर्व.) – वह

कुत्र (अ०) –कहाँ,

वि + लस् (धा.प.) –शोभित होना

आम् (अ.) –अनुमति देना

विहगः (खगः) (पुँ.) –पक्षी

अभ्यासः

(क) **प्रयोग कीजिए** –

पचति, धावति, खादति, नृत्यति, आगच्छति।

(ख) **खाली स्थान भरिए** –

(१) ....गच्छामि। (२) ....धावथ। (३)........नृत्यसि

(४) ....गुञ्जन्ति। (५) ....नयामः।

(ग) **उचित क्रिया लिखिए** –

(१) वयम्..........(आ+गम्)। (२) यूयम्............ (क्रीड्)

(३) युवाम्.......... (धाव्) । (४) ते...............(भष्)।

(५) सा...............(क्षिप्)

सोपानम्-१६

प्रथमपुरुषः

(स्त्रीलिंग-द्विवचनम्)

रमा लता च धावतः। **रमा लता च किम् कुरुतः** ? ते धावतः।

उमा शोभा च खादतः। **उमा शोभा च किम् कुरुतः** ? ते खादतः।

सुभद्रा सरला च भ्रमतः **सुभद्रा सरला च किम् कुरुतः ?** ते भ्रमतः।

बालिके लिखतः। **ते गायतः।**

पद्मा चन्द्रिका च नृत्यतः। **पद्मा चन्द्रिका च किम् कुरुतः** ? ते नृत्यतः।

कमला कोकिला च गायतः। **ते किम् कुरुतः** ? ते गायतः।

रमा राधा च कदा पठतः । **रमा राधा च कदा पठतः ?** ते प्रातः पठतः।

चटके कूजतः। **ते नृत्यतः**

शोभा शान्ता च कदा क्रीडतः ? ते सायं क्रीडतः।

सुमित्रा सुलोचना च कुत्र गच्छतः ? **ते तत्र गच्छतः।**

जया विजया च कुत्र भ्रमतः ? ते अत्र भ्रमतः।

<u>**शब्दकोशः**</u> –

ते (सर्व. स्त्री.) = वे दो, दोनों

पूज् (धा. प.)–पूजा करना

चटके (सं.स्त्री.द्वि.)–दो चिड़िया

कूज् (धा.प.)–कूजना

स्मर् (धा.प.)–याद करना

स्निह् (धा.प.)–स्नेह करना

क्व(अ.)–कहाँ,

वि + हृ (वि + हर्) (धा.प.)–विहार करना

छात्रः (पुं.)– विद्यार्थी

(क) **खाली स्थान भरिए –**

(१)..........पठतः। (२) ....स्मरन्ति। (३)........स्निह्यन्ति

(४) ....नयतः। (५) ....विहरतः। (४) ....कूजतः।

(७) .....आगच्छन्ति। (८) ....धावन्ति।

(ख) **लिखिए, उच्चारण करिए और अन्तर पहचानिए–**

(१) ते तत्र गच्छन्ति। ते तत्र गच्छतः।

(२) किम् ते प्रातः विहरन्ति ? किम् ते प्रातः विहरतः ?

(३) ते सायं धावन्ति। ते सायं धावतः।

सोपानम्-१७

प्रथमपुरुषः
(स्त्रीलिंग-बहुवचनम्)

सुभद्रा, सरला सुधा च वदन्ति। **सुभद्रा, सरला सुधा च किम् कुर्वन्ति?**

ताः वदन्ति।

विजया, जया विभा च स्पृह्यन्ति। **विजया, जया विभा च किम् कुर्वन्ति?**

ताः स्पृह्यन्ति।

पद्मा, प्राची चन्द्रिका च रचयन्ति। **पद्मा प्राची चन्द्रिका च किम् कुर्वन्ति?**

ताः रचयन्ति।

ताः गायन्ति। **उमा, शोभा शीला च सिञ्चन्ति।**

ताः तत्र सिञ्चन्ति ।

लता, ज्योत्स्ना कोकिला च प्रशंसन्ति।

ताः एव प्रशंसन्ति। **ताः नृत्यन्ति।**

वार्तालापः

रमा – सुनन्दा, सरला विभा च कुत्र क्रीडन्ति?

उमा – ताः तत्र क्रीडन्ति।

रमा – ताः अधुना पठन्ति क्रीडन्ति वा?

उमा – ताः अधुना क्रीडन्ति न तु पठन्ति।

रमा – यदा रमेशः रमणः च पिबतः, किम् तदा शोभा अपि पिबति?

उमा– आम्, सा अपि पिबति।

रमा – किम् लता उमा च नृत्यतः?

उमा – नहि, ते न नृत्यतः, ते तु सीव्यतः।

रमा – किम् ताः सायं विहरन्ति?

उमा – आम्, ताः सायं विहरन्ति।

रमा – किम् ते प्रातः पूजयतः?

उमा – आम्, ते प्रातः पूजयतः।

शब्दकोशः–

ताः (सर्व०स्त्री)–वे सब

वद् (धा. प.)–कहना

स्पृह् (धा., उ.प.)–इच्छा करना

रच् (धा०.उ.प०)– रचना करना

किम् (अ.)–क्या

प्र + शंस् (धा.प.)–प्रशंसा करना

सीव् (धा.प.)–सीना (सिलना)

अभ्यासः –

(क) **निम्न धातुओं से वाक्य बनाए**–स्पृह्, सिच्, पूज्, सीव्, स्निह्, नृत्

(ख) **लिखिए और उच्चारण करिए** –

(१) सः नमति। सा नमति।

(२) तौ पूजयतः। ते पूजयतः।

(२) ते रचयन्ति। ताः रचयन्ति।

(४) तौ वदतः। ते वदन्ति।

लेखन :-

(क) **निम्नलिखित में सही मिलान कीजिए** –

सः	तत्र	पठावः
त्वम्	कदा	लिखति
सा	अत्र	पठसि
वयम्	एव	वदामि
ते	बहिः	पूजयथ
यूयम्	कुत्र	स्निह्यथः
युवाम्	एव	कथयन्ति
अहम्	तदा	रचयति

व्याकरणम् –

	ए.व.	द्वि व.	ब.व.
उ.पु. –	मि	वस्	मस्
म.पु. –	सि	थस्	थ
प्र.पु. –	ति	तस्	अन्ति

प्रयोग :

(१) वद् + अ + ति = वदति।

(२) वस् +अ + ति = वसति।

(३) भू +अ + ति = भ् + ओ+ अ+ति = भ् + अव् + अ + ति = भवति।

(४) नी + अ + ति

ने + अ + ति

न् + अय् + अ + ति

नयति।

(५) बुध् + अ + ति

ब् उ+ ध् + अ +ति

ब् + ओ + ध् + अ +ति

बोधति।

(६) स्मृ + अ + ति

स्म् + ऋ + अ + ति

स्म् + अर् + अ + ति

स्मरति

(७) बुध् + अ + मि

बोध् + आ + मि = बोधामि।

बोध् + आ + वः = बोधावः।

बोध् + आ + मः = बोधामः।

(८) जीव् + अ + ति = जीवति।

(९) निन्द् +अ + ति = निन्दति।

सोपानम्-१८

अवबोधनम्

शब्दरूपाणि उपसर्गाः च

अहम् बोधामि। **बोधः भवति।** **जीवाः भवन्ति।**
बालः बोधति। **लताः भवन्ति।** **ज्ञानम् भवति।**

	बुध् (धा.प.)			भू (धा.प.)		
पुरुषः	**ए.व.**	**द्वि व.**	**ब.व**	**ए.व.**	**द्वि व.**	**ब.व.**
उ.पु.-	बोधामि	बोधावः	बोधामः।	भवामि	भवावः	भवामः।
म.पु.-	बोधसि	बोधथः	बोधथ।	भवसि	भवथः	भवथ।
प्र.पु.-	बोधति	बोधतः	बोधन्ति।	भवति	भवतः	भवन्ति।

अकारान्त-पुँल्लिग 'बाल' शब्दः

विभक्तिः	**ए.व.**	**द्वि.व.**	**ब.व.**	**अर्थः**
प्रथमा-	बालः	बालौ	बालाः	ने
द्वितीया-	बालम्	बालौ	बालान्	को
तृतीया-	बालेन	बालाभ्याम्	बालैः	से, के द्वारा
चतुर्थी-	बालाय	बालाभ्याम्	बालेभ्यः	के लिए
पञ्चमी-	बालात्	बालाभ्याम्	बालेभ्यः	से (पृथक्)
षष्ठी-	बालस्य	बालयोः	बालानाम्	का, के, की
सप्तमी-	बाले	बालयोः	बालेषु	में, पर
संबोधनम्-	हे बाल!	हे बालौ!	हे बालाः!	हे, अरे

उ०पु० = उत्तमपुरुषः ए०व० = एकवचनम्
म०पु० = मध्यमपुरुषः द्वि०व० = द्विवचनम्
प्र०पु० = प्रथमपुरुषः ब०व० = बहुवचनम्

आकारान्त स्त्रीलिंग 'लता' शब्दः

विभक्तिः	ए.व.	द्वि.व.	ब.व.
प्रथमा –	लता	लते	लताः
द्वितीया–	लताम्	लते	लताः
तृतीया –	लतया	लताभ्याम्	लताभिः
चतुर्थी –	लतायै	लताभ्याम्	लताभ्यः
पञ्चमी–	लतायाः	लताभ्याम्	लताभ्यः
षष्ठी–	लतायाः	लतयोः	लतानाम्
सप्तमी–	लतायाम्	लतयोः	लतासु
सम्बोधनम् –	हे लते!	हे लते!	हे लताः!

अकारान्त – नपुंसकलिंग 'फल' शब्दः –

विभक्तिः	ए.व.	द्वि.व.	ब.व.
प्रथमा–		फलम्	फले फलानि
द्वितीया	–	फलम्	फले फलानि
संबोधनम–	फल!	फले!	फलानि!

(फल के अन्य विभक्तियों में शेष रूप बाल के समान होते हैं)

इकरान्त स्त्रीलिंग 'मति' शब्द–

उकारान्त पुँल्लिंग 'गुरु' शब्दः

विभक्तिः	ए.व.	द्वि.व.	ब.व.	ए.व.	द्वि.व.	ब.व
प्रथमा–	मतिः	मती	मतयः	गुरुः	गुरू	गुरवः
द्वितीया–	मतिम्	मती	मतीः	गुरुम्	गुरू	गुरून्
तृतीया–	मत्या	मतिभ्याम्	मतिभिः	गुरुणा	गुरुभ्याम्	गुरुभिः
चतुर्थी–	मत्यै	मतिभ्याम्	मतिभ्यः	गुरवे	गुरुभ्याम्	गुरुभ्यः
पञ्चमी–	मत्याः	मतिभ्याम्	मतिभ्यः	गुरोः	गुरुभ्याम्	गुरुभ्यः

षष्ठी–	मत्याः	मत्योः	मतीनाम्	गुरोः	गुर्वोः	गुरूणाम्
सप्तमी–	मत्याम्	मत्योः	मतिषु	गुरौ	गुर्वोः	गुरुषु
सम्बोधनम्–	हे मते !	हे मते !	हे मतयः	हे गुरो !	हे गुरू !	हे गुरवः !

उपसर्गाः– प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप ।

शब्दान् पश्यतु। उपसर्गान् चिनोतु–

प्रदेशः, पराक्रमः, अपकीर्तिः, अपवर्गः, समन्वयः, अनुबोधः, अवस्था, अवकाशः, निश्चिन्तः, निर्देशः, दुश्शासनः, दुष्कर्म, दुर्जनः, दुर्योधनः, विदेशः, आदेशः, आदर्शः, निगमः, निपुणः, अधिकारः, अतिरिक्तः, सुग्रीवः, सुलक्षणः, उत्तमः, उत्तरम्, अभिरुचिः, प्रतिज्ञा, परिक्रमः, उपकारः।

ध्यातव्यम्–

(१) पुँल्लिंगः, स्त्रीलिंगः, नपुंसकलिंगः

(२) एकवचनम्, द्विवचनम्, बहुवचनम्।

(३) प्रथमा, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी, सप्तमी, संबोधनम्।

(४) देव, शुक, पिक, श्याम, राम आदि के रूप अकारान्त पुँल्लिग बाल के समान होते हैं। पुत्र, आसन, मित्र, पुष्प आदि के रूप नपुंसकलिंग फल के समान तथा सुधा, रमा, सुलेखा, गंगा, यमुना आदि के रूप स्त्रीलिंग आकारान्त–लता के समान होते हैं।

वाक्यानि लिखतु	द्विवचने	बहुवचने
१. सुधा खादति।	....	....
२. श्यामः उवविशति।	....	....
३. मित्रम् तिष्ठति।	....	....
४. सुधा गायति।	....	....
५. पत्रम् पतति।	....	....
६. बालकः पश्यति।	....	....

निम्नलिखित से वाक्य बनाइए –

करोति, ददाति, पाति, जानाति, उपविशति, पश्यति, वसति, गायति, गच्छति, पृच्छति क्रीणाति, खादति, उपविशति, वसति, अस्ति, ताडयति, गच्छति, करोति, क्रीडति, पठति।

उत्तमपुरुषवाक्यानि लिखतु

	एकवचने	बहुवचने
१. खादति	....	....
२. पृच्छति	....	....
३. उपविशति	....	....
४. स्मरति	....	....
५. पश्यति	....	....
६. तिष्ठति	....	....
७. क्रीडति	....	....
८. पिबति	....	....
९. मिलति	....	....
१०. लिखति	....	....

मध्यमपुरुषस्य वाक्यानि लिखतु

	एकवचने	बहुवचने
१. शृणोति	....	....
२. प्राप्नोति	....	....
३. शक्नोति	....	....
४. स्वीकरोति	....	....
५. ददाति	....	....
६. जानाति	....	....

उदाहरणं पश्यतु। अभ्यासं करोतु।

१. लिखति	छात्रः लिखति.....	छात्राः लिखन्ति.....
२. खादति	....	....
३. क्रीडति	....	....
काकः पक्षिणां/पक्षिषु वा धूर्तः भवति। = कौआ पक्षियों में धूर्त होता है।

शृगालः पशूनां/पशुषु वा धूर्तः भवति। = सियार पशुओं में धूर्त होता है।

पठतां/पठत्सु बालेषु गोपालः चतुरतमः वर्तते। = पढ़ने वाले बालको में गोपाल अत्यन्त चतुर है।

स्निह्, (प्रेम करना) - यशोदा श्रीकृष्णे स्निह्यति। = यशोदा श्रीकृष्ण को स्नेह करती है

वि + अव + हृ - व्यवहरति सदाचारे आचार्यः। = आचार्य सदाचार का व्यवहार करता है।

साधु, असाधु (अच्छा या बुरा) - दिनेशः मातरि साधुः असाधुः वा? =दिनेश माता के लिए अच्छा है या बुरा।

निमित्त (निमित्त/कारण में)-चर्मणि दीपिनं हन्ति, दन्तयोर्हन्ति कुंजरम्।

क्रिया के निश्चित समय, दिन, सप्ताह, मास, वर्ण आदि के निर्देश में-एतस्मिन् समये कः बहिर्गमिष्यति। गतदिने अतिवृष्टिः अभवत्।

पहली क्रिया में - उदिते नैषधे काव्ये क्व माघः क्व च भारविः।

संलग्न (लीन होने में) - कर्मणि संलग्नः, पाठे लीनः, योगाभ्यासे निरतः आदि।

प्रवीणः, चतुरः आदि के योग में - सः वीणायां प्रवीणः, चित्रकलायां चतुरः।

सोपानम्-२८

सन्धि-परिचयः

सन्धियाँ मुख्यतः तीन प्रकार की होती हैं- स्वर, व्यञ्जन और विसर्ग सन्धियाँ। क्रमशः सभी का परिचय नीचे दिया जा रहा है-इससे पूर्व देवनागरी वर्णमाला का पुनः अभ्यास आवश्यक है। अतः पहले वर्णमाला को ध्यान से पढ़िए-

देवनागरी वर्णमाला

वर्ण तीन प्रकार के होते हैं-स्वर, व्यञ्जन और अयोगवाह।

वर्ण—

१. स्वर-

ह्रस्व	**दीर्घ**		**अयोगवाह**
अ,इ,उ,ऋ	आ,ई,ऊ,ऋ		अनुस्वार (अं), विसर्ग(अः)
	(गुण)(वृद्धि)	**(गुण) (वृद्धि)**	
	ए, ऐ,	ओ, औ	

२. व्यञ्जन—

स्पर्श	**अंतःस्थ**	**ऊष्म**
कवर्ग -क ख ग घ ङ।	य र ल व	श ष स ह
चवर्ग - च छ ज झ ञ।		
टवर्ग - ट ठ ड ढ ण।		
तवर्ग - त थ द ध न।		
पवर्ग - प फ ब भ म।		

स्वरों का दूसरा नाम 'अच्' भी है और व्यञ्जनों का दूसरा नाम 'हल्' भी है।

जब व्यञ्जन में स्वर नहीं होता, तो उसे हलन्त कर देते हैं, जैसे **क् ख् ग्।**

इसके बाद सन्धियों को समझने में अधिक सरलता होगी।

आइए अब सन्धियों का परिचय प्राप्त करते हैं ।

स्वर - सन्धियाँ

दीर्घ, गुण, वृद्धि, यण्, अयादि, पूर्वरूप, प्रकृतिभाव— सन्धियाँ

१. **दीर्घ सन्धिः** - ह्रस्व या दीर्घ अ, इ, उ और ऋ से परे यदि उसी के साथ का ह्रस्व या दीर्घ स्वर होगा तो पूर्व और पर दोनों के मेल से एक दीर्घ हो जाएगा। जैसे **हिम+आलयः** = हिमालयः। **रवि+इन्द्रः** = रवीन्द्रः। **वधू+उत्सवः**= वधूत्सवः। **पितृ+ऋणम्**= पितृ णम्।

२. **गुण सन्धिः**- ह्रस्व या दीर्घ अ के बाद यदि ह्रस्व या दीर्घ इ होगी, तो दोनों के मेल से 'ए' और यदि उ या ऊ होगा तो दोनों के मेल से 'ओ' और यदि ऋ होगा तो दोनों के मेल से अर् हो जाएगा। यही गुण सन्धि है। जैसे - **सुर+इन्द्रः**= सुरेन्द्रः। **पर+उपकारः**= परोपकारः। **महा+ऋषिः** = महर्षिः।

३. **वृद्धि सन्धिः**-अ या आ से परे ए या ऐ आने पर पूर्वपर के स्थान में ऐ और ओ या औ आने पर पूर्वपर के स्थान में औ हो जाता है जैसेः - **एक+एकः**= एकैकः। महा+ऐश्वर्यम्= महैश्वर्यम्। **महा+ औत्सुक्यम्** = महौत्सुक्यम्।

४. **यण् सन्धिः**-ह्रस्व या दीर्घ इ, उ, ऋ से परे यदि भिन्न जाति का स्वर होगा तो क्रमशः उन्हें य्, व्, र् हो जायेगें और फिर अगले स्वर की मात्रा उन में मिल जाएगी। जैसे :-

यदि+अपि=यद्+य्+अपि = यद्यपि। **सु+आगतम्= सु+व्+आगतम्** = स्वागतम्। **पितृ+अर्थम्= पित्+र्+अर्थम्**= पित्रर्थम्।

५. **अयादि सन्धिः**- ए, ए, ओ, औ से परे यदि कोई भी स्वर होगा, तो

उन्हें क्रमशः अय्, आय्, अव्, आव् हो जाएगा और फिर य् या व् अगले स्वर की मात्रा में मिल जाएगा। जैसे :- **ने+अति= न्+अय्+अति** नयति। **गै+अक = ग्+आय्+अकः**= गायकः। **भो+अनम्=भ्+अव+अनम्**=भवनम्। पौ+अकः= प्+आव्+अकः =पावकः।

६. **पूर्वरूप सन्धिः**- यह सन्धि अयादि सन्धि का अपवाद है। यदि शब्द के अन्त में ए या ओ आ जाए और उस के बाद ह्रस्व अ हो, तो अ को ए या ओ का रूप हो जाता है। अर्थात् अ नहीं रहता। अ वहाँ था यह बताने के लिए ऽ (अवग्रह) चिह्न लगा दिया जाता है। जैसे-**वृक्षे+अपि=** वृक्षेऽपि। **नरो+अयम्**= नरोऽयम्। **सिंहो+अगच्छत्**= सिंहोऽगच्छत्।

७. **प्रकृतिभाव :** - यह सन्धि के निषेध का नियम है। द्विवचन के दीर्घ ई, ऊ और ए की सन्धि नहीं होती । जैसे- **साधू+आगच्छतः**= साधू आगच्छतः (यहाँ भी यण् सन्धि नहीं हुई) **बालिके+आगच्छतः**= बालिके आगच्छतः (यहाँ अयादि सन्धि नहीं हुई)

व्यञ्जन सन्धि - जब वर्णों के मेल से व्यञ्जनों में परिवर्तन होता है, तो उसे व्यञ्जन-सन्धि कहते हैं। व्यञ्जन-सन्धि के अनेक भेद हैं। जैसे-

जश्त्व, अनुस्वार, परसवर्ण, श्चुत्व, अन्तिम न् की सन्धि

१. **जश्त्व (या तृतीयाक्षर) की सन्धिः**-यदि शब्द के अन्त में किसी वर्ग का प्रथम वर्ण हो और उस के बाद स्वर, वर्गों के तृतीय, चतुर्थ, अन्तःस्थ अथवा ह् वर्णो में से कोई वर्ण हो, तो प्रथम वर्ण को तृतीय वर्ण हो जाता है। जैसे **तत्+अस्ति**= तदस्ति। **जगत्+ईश्वरः** = जगदीश्वरः।

२. **अनुस्वार-सन्धि :** -म् से परे यदि व्यञ्जन हो, तो म् को अनुस्वार हो जाता है। जैसेः- **रामम्+वन्दे**= रामंवन्दे। **सम्+शयः**= संशयः।

३. **अनुस्वार को परसवर्ण :**-अनुस्वार से परे यदि वर्गीय वर्ण हो, तो अनुस्वार को उस वर्ग का पञ्चम वर्ण विकल्प से हो जाता है। जैसेः- **कार्यम्+करोति** = कार्यं करोति या कार्यङ्करोति।

मन्दम् + चलति = मन्दं चलति या मन्दञ्चलति।

४. **श्चुत्व (श् और चवर्ग):-** तवर्ग के वर्ण तथा स् वर्ण यदि किसी चवर्गीय या श् वर्ण के साथ हों, तो तवर्गीय वर्णों को क्रम से चवर्गीय वर्ण और स् को श् हो जाता है। जैसे-**तत्+च**= तच्च। **उद्+ज्वलः**= उज्ज्वलः।

५. **न् की सन्धिः** - यदि शब्द के अन्तिम न् के बाद च् या छ् हो तो न् को श्, और त या थ् हो तो न् को स् करके पहले स्वर पर अनुस्वार या अनुनासिक लगा देते हैं। जैसे - **कस्मिन्+चित्**= कस्मिँश्चित्।

विसर्ग सन्धि : - जब किसी विशेष वर्ण के पास होने पर विसर्ग में परिवर्तन होता है, तो उसे विसर्ग-सन्धि कहते हैं। विसर्ग-सन्धि के मुख्य भेद ये हैं:-

विसर्ग को उ, विसर्ग को स्, विसर्ग का लोप सन्धि, विसर्ग को रेफ(र्) सन्धि—

१. **विसर्ग को उ** - (क) यदि पहले ह्रस्व अ हो और उसके बाद विसर्ग तथा उसके बाद ह्रस्व अ आये तो विसर्ग को उ हो जाता है।
जैसे:- **रामः+अपि = राम+उ+अपि** = रामो+अपि (गुण करके) = रामोऽपि (अ को पूर्वरूप करके)

(ख) ह्रस्व अ के बाद यदि विसर्ग हो और उसके बाद वर्गीय ३,४,५ या अन्तःस्थ या ह् वर्णो में से कोई हो, तो भी विसर्ग को उ हो जाता है।

जैसे **सिहः+गच्छति = सिंह+उ+गच्छति** = सिहो गच्छति। **देवः+नमति = देव+उ+नमति** = देवो नमति।

२. **विसर्ग को स् :**-यदि विसर्ग से परे च्, छ्, ट्, ठ्, त्, थ्, श्, ष्, स्, में से कोई वर्ण हो, तो विसर्ग को स् हो जाता है। जैसे:-**गजः+चलति= गजस्+चलति=** गजश्चलति (श्चुत्व करके)।

३. **विसर्ग का लोपः**- (क) ह्रस्व अ के बाद यदि विसर्ग हो और उसके बाद ह्रस्व अ को छोड़ कोई अन्य स्वर हो, तो विसर्ग का लोप हो जाता है। जैसे-**बालकः+आगच्छति** = बालक आगच्छति।

(ख) यदि दीर्घ आ के बाद विसर्ग हो और फिर कोई स्वर, वर्गीय ३,४,५ या अन्तःस्थ या ह् वर्णों में से कोई वर्ण हो, तो भी विसर्ग-लोप हो जाता है। जैसे **देवाः+आगच्छन्ति**= देवा आगच्छन्ति। **छात्राः+नमन्ति** = छात्रा नमन्ति।

(ग) यदि विसर्ग या रेफ् (र्) से परे र हो तो पहले विसर्ग या रेफ का लोप हो जाता है और उससे पहले स्वर को दीर्घ हो जाता है। जैसेः- **निर्(:)+रसः**= नीरसः। **निर्(:)+रोग**= नि+रोगः= नीरोगः।

४. **विसर्ग को रेफ** (र्):-यदि अ आ को छोड़ कर विसर्ग से पूर्व कोई अन्य वर्ण हो और उसके बाद कोई स्वर, वर्गीय ३,४,५, अन्तःस्थ या ह् वर्णों में से कोई वर्ण हो, तो विसर्ग को र् हो जाता है। जैसे -**मतिः+एषा**= मतिरेषा। **साधुः+गच्छति**= साधुर्गच्छति।

सोपानम्-२९

‘तुमुन्’ ‘क्त्वा’ ‘ल्यप्’ प्रत्ययानां प्रयोगः

क ‘तुमुन्’ प्रत्ययस्य प्रयोगः

‘तुमुन्’ ‘क्त्वा’ तथा ‘ल्यप्’ आदि कृदन्त प्रत्यय हैं। ‘के लिए’ अर्थ में धातु से तुमुन् प्रत्यय लगाया जाता है। तुमुन् में से ‘उन्’ का लोप होकर शेष् ‘तुम्’ रह जाता है। ‘तुम्’ प्रत्यय लगाते समय सेट् धातुओं से ‘तुम्’ से पूर्व ‘इ’ लग जाता है, जैसे –

i) **मालाकारः पुष्पाणि चेतुम् उद्यानम् गच्छति।**

त्वं किं कर्तुम् उद्यानम् गच्छसि ?

ii) **अर्जुनः योद्धुम् उद्यतः अस्ति।**

त्वं किं कर्तुम् उद्यतः असि ?

iii) **त्वं पुराणं पठितुम् इच्छसि।**

त्वं किं पठितुम् इच्छसि ?

iv) **जनकः गंगायां स्नातुं हरिद्वारम् अगच्छत्।**

जनकः किं कर्तुं हरिद्वारम् अगच्छत् ?

ख. ‘क्त्वा’ प्रत्ययस्य प्रयोगः

१. ‘कर’ या ‘कर के’ अर्थ के लिए सामान्यतः क्त्वा या ल्यप् प्रत्यय का प्रयोग होता है। क्त्वा में से ‘त्वा’ शेष रहता है। क्त्वा प्रत्ययान्त शब्दों के रूप इस प्रकार बनते हैं–

पठ् + क्त्वा = पठित्वा। **खाद् + क्त्वा** = खादित्वा।

गम् + क्त्वा = गत्वा। भू + क्त्वा = भूत्वा आदि।

प) छात्रः नत्वा गुरुं प्रणमति। नम् + क्त्वा

कः नत्वा गुरुं प्रणमति ?

ग. 'ल्यप्' प्रत्ययस्य प्रयोगः

यदि धातु से पूर्व उपसर्ग लगा हो तो 'करके' अर्थ में 'क्त्वा' के स्थान पर 'ल्यप्' प्रत्यय लगाया जाता है। 'ल्यप्' में से 'य' शेष रहता है। रूप इस प्रकार बनते हैं–

आ + **गम्** +**ल्यप्** = आगत्य।

अनु + **कृ** +**ल्यप्** = अनुकृत्य।

अनु + **भू** +**ल्यप्** = अनुभूय आदि

यथा – **मातापितरौ प्रणम्य पुत्रः विदेशं गच्छति।**

कौ प्रणम्य पुत्रः विदेशं गच्छति?

ii) **छात्राः पुस्तकानि अधीत्य पाठं स्मरन्ति।**

कानि अधीत्य छात्राः पाठं स्मरन्ति?

iii) **सेवकः स्वामिनं प्रशंस्य सुखं लभते।**

कं प्रशंस्य सेवकः सुखं लभते?

शिष्यः विद्यालयं प्रविश्य गुरुं प्रणमति।

आवृत्तिः

अहं **पठितुं** वाचनालयं गच्छामि।

अहं **पठित्वा** आपणं प्रविशामि।

धेनवः **चरितुं** क्षेत्रं गच्छन्ति।

ताः **चरित्वा** गृहम् आगच्छन्ति।

रमेशः भोजनं **खादितुं** पाकशालाम् उपविशति।

सः भोजनं **खादित्वा** हस्तौ प्रक्षालयति।

सरला ईश्वरं **स्मर्तुं** मालां जपति।

सा ईश्वरं **स्मृत्वा** शान्तिम् आप्नोति।

बालाः **क्रीडितुम्** उपवने धावन्ति।

ते **क्रीडित्वा** स्वस्वगृहं गच्छन्ति।

वार्तालापः

हरीशः – मनीषे! अहं पठित्वा वृक्षम् आरोहामि। (पठित्वा)

मनीषा – हरीश! वृक्षम् आरुह्य किं करोषि? (आरुह्य)

हरीशः – अत्र आगत्य स्वयम् एव पश्य। (आगत्य)

मनीषा – परम् अहं वृक्षम् आरोढुं न शक्नोमि। (आरोढुम्)

हरीशः – अस्तु। अहं पक्वानि आम्राणि पातयामि। तानि निरीक्ष्य गणयित्वा च करण्डके स्थापय। (निरीक्ष्य, गणयित्वा)

मनीषा – शीघ्रं कुरु। वानराः आगच्छन्ति।
तान् दृष्ट्वा अहं भीता। (दृष्ट्वा)

हरीशः – आम्राणि गृहीत्वा धावित्वा च गृहं गच्छ। (गृहीत्वा,धावित्वा)

मनीषा – त्वम् अचिरात् कूर्दित्वा शाखाम् अवलम्ब्य अधः आगच्छ। (कूर्दित्वा, अवलम्ब्य)

(उभौ उत्प्लुत्य गृहं धावतः) (उत्प्लुत्य)

अभ्यासः-

१. खाली स्थान भरिए-

यथा- पंकजः वेदान् अधीत्य प्रसीदति।

(i) रेखा क्रीडनकानि.................... गच्छति।

(ii) रेखा दुग्धं .... वर्धते।

(iii) पंकजः गृहं .... पठति

(iv) पंकजः वेदान् ....प्रसीदति।

(v) मित्रं देशं .... संकल्पते।

(vi) मित्रं क्रीडनकानि .... गच्छति।

(vii) सः गृहं .... पठति।

(viii) सः दुग्धं .... वर्धते।

(ix) सा देशं ....संकल्पते।

(x) सा वेदान् .... प्रसीदति।

२. लिखिए और स्मरण करिए—

धातु	**क्त्वा**	**तुमुन्**	**उपसर्ग**	**ल्यप्**
दा	दत्वा	दातुम्	आ	आदाय
गम्	गत्वा	गन्तुम्	अव	अवगम्य
कृ	कृत्वा	कर्तुम्	उप	उपकृत्य
चिन्त्	चिन्तयित्वा	चिन्तयितुम्	वि	विचिन्त्य
स्था	स्थित्वा	स्थातुम्	प्र	प्रस्थाय
श्रु	श्रुत्वा	श्रोतुम्	प्रति	प्रतिश्रुत्य
नम्	नत्वा	नन्तुम्	प्र	प्रणम्य
विश्	विष्ट्वा	वेष्टुम्	उप	उपविश्य
हस्	हसित्वा	हसितुम्	वि	विहस्य

सोपानम्-३०

क्त-क्तवतु-शतृ - शानच्-प्रत्यय-प्रयोगः

<u>क्त-क्तवतु-प्रयोगः</u>

'क्त' तथा 'क्तवतु' कृदन्त प्रत्यय हैं। ये दोनों ही भूतकालिक प्रत्यय हैं। अन्तर यह है कि 'क्त' प्रत्यय कर्मवाच्य तथा भाववाच्य में होता है; जबकि 'क्तवतु' प्रत्यय का प्रयोग कर्तृवाच्य में होता है। 'क्त' में 'क' का लोप होकर शेष 'त' बचता है तथा 'क्तवतु' में से 'तवत्' शेष रहता है। क्त प्रत्ययान्त शब्दों के रूप इस प्रकार बनते हैं–

भू + **क्त** = भूत। **पठ्** + **क्त** = पठित। **स्मृ** + **क्त** = स्मृत।

हस् + **क्त** = हसित। **दृश्** + **क्त** = दृष्ट। **गम्** + **क्त** = गत आदि।

क्तवतु प्रत्ययान्त शब्दों के रूप इस प्रकार बनते हैं—

गम् + **क्तवतु** = गतवत्। **पठ्** + **क्तवतु** = पठितवत्।

क्तवतु प्रत्ययान्त रूप 'क्त' प्रत्ययान्त शब्दों से 'वत्' जोड़ने से बन जाते हैं। 'क्त' तथा 'क्तवतु' प्रत्यय—युक्त शब्द तीनों लिंगों में अलग-अलग तरह से होते हैं।

अर्थात् धातु दो प्रकार की होती हैं, अकर्मक और सकर्मक। कर्म-रहित धातुओं को अकर्मक तथा कर्मयुक्त धातुओं को सकर्मक धातु कहते हैं।

कृष्णः कंसम् अमारयत्।

अत्र कः कर्ता ? - **कृष्णः।**

अत्र किं कर्म ? - **कंसम्।**

क्रियायाः सम्बन्धः केन सह वर्तते ? **कृष्णेन सह।**

नूनमत्र कर्ता कृष्णः, कर्म कंसम् क्रियायाः सम्बन्धः (पुरुषः वचनम् च) कृष्णेन सह वर्तते।

यदा 'क्त' प्रत्ययः युज्यते तर्हि वाक्यं कर्मवाच्ये परिवर्तनीयम्-

कृष्णेन कंसः अमार्यत/मारितः/हतः। अत्र हतः/मारितः शब्दस्य विभक्तिः वचनं च कस्य अनुरूपं वर्तते ?

कृष्णम्, कंसस्य, कृष्णेन इत्यत्र का विभक्तिः किं वचनम्..................।

कृष्णेन कंसः मारितः- अत्र विभक्तिः वचनं च अनुरूपम्।

इत्यत्र का विभक्ति किं वचनम् ?

'**कंसः**' इत्यत्र प्रथमा विभक्तिः एकवचनम्।

'**हतः**' इत्यत्र का विभक्ति किं वचनम् ?

'**हतः**' इत्यत्र प्रथमा विभक्तिः एकवचनम्।

अतः वयं पश्यामः यत् कर्मवाच्ये क्रिया कर्मवत् भवति न तु कर्तृवत्। कर्त्ता तु तृतीया-विभक्त्याम् प्रयुज्यते।

अभ्यासः

	धातुः	प्रत्ययः
(i) बालकेन पाठः **पठितः**।	पठ्	क्त
(ii) विकासेन कृष्णसर्पः **दृष्टः**।	दृश्	क्त
(iii) नीरजेन पूजा **कृता**।	लिख्	क्त
(iv) भक्तेन पूजा **कृता**।	कृ	क्त
(v) जनकेन ग्रामः **रक्षितः**	रक्ष्	क्त
(vi) छात्रेण रामायणम् **श्रुतम्**।	श्रु	क्त
(vii) वानरेण फले **त्रोटिते**।	त्रुट्	क्त

	धातुः प्रत्ययः			धातुः प्रत्ययः
(i)	**आप्त** = आप् + क्त		(i)	**प्राप्त** = प्र + आप्+क्त
(ii)	**प्रविष्ट** = प्र + विश् + क्त		(ii)	**प्रणष्ट** = प्र + नस्+क्त
(iii)	**भ्रान्त** = भ्रम् + क्त		(iii)	**श्रान्त** = श्रम् + क्त

(iv)	**श्रुतम्**	=	श्रु + क्त	(iv)	**स्मृत**	=	स्मृ + क्त
(v)	**गत**	=	गम् + क्त	(v)	**नत**	=	नम् + क्त
(vi)	**उषित**	=	वस् + क्त	(vi)	**उदित**	=	वद् + क्त
(vii)	**पृष्ट**	=	प्रच्छ् + क्त	(vii)	**दृष्ट**	=	दृश् + क्त
(viii)	**सिद्ध**	=	सिध् + क्त	(vii)	**वृद्ध**	=	वृध् + क्त
(ix)	**लिखित**	=	लिख् + क्त	(ix)	**पठित**	=	पठ् + क्त
(x)	**कथित**	=	कथ् + क्त	(x)	**भक्षित**	=	भक्ष् + क्त

(i) **(पठ्+क्त)** पठितम् पुस्तकम्।

(ii) **(भी+क्त)** भीता कन्या।

(iii) **(खाद्+क्त)** खादितं भोजनम्।

(iv) **(श्रु+क्त)** श्रुता गीता।

(v) **(प्रच्छ्+क्त)** पृष्टः प्रश्नः।

'क्तवतु' प्रत्यय कर्तृवाच्य में भूतकाल में प्रयुक्त किया जाता है।

	लङ्लकारः	'क्तवतु' प्रत्ययान्तरूपम्
	अपठत्	**पठितवान्**
(i)	अकरोत्	कृतवान्
(ii)	अशृणोत्	श्रुतवान्
(iii)	आनयत्	आनीतवान्
(iv)	अत्यजत्	त्यक्तवान्
(v)	अखादत्	खादितवान्
(vi)	आर्पयत्	अर्पितवान्

एकवचनरूपाणि बहुवचने पश्यन्तु –

	एकवचनम्	**बहुवचनम्**
	पठितवान्	पठितवन्तः
(i)	कृतवान्	कृतवन्तः
(ii)	हसितवान्	हसितवन्तः
(iii)	त्यक्तवान्	त्यक्तवन्तः
(iv)	दत्तवान्	दत्तवन्तः
(v)	आनीतवान्	आनीतवन्तः

ज्ञातव्यं यत् क्तवतु – प्रत्ययस्य अपि रूपाणि त्रिषु लिङ्गेषु चलन्ति।

यथा	**पुँल्लिंगे**	**स्त्रीलिङ्गे**	**नपुंसकलिङ्गे**
	पठितवान्	पठितवती	पठितवत्
शेषाणि रूपाणि	'भवत्' वत्	'नदी' वत्	'जगत्' वत्।

लिखिए और अभ्यास करिए—

त्वम् अद्य किं पठितवान्?

मया अद्य पद्यानि पठितानि।

प्र. रामायणम् कः लिखितवान्?

उ. **रामायणम् आदिकविना बाल्मीकिना लिखितम्।**

प्र. महर्षिः व्यासः किं रचितवान्?

उ. **महर्षिणा व्यासेन महाभारतं रचितम्।**

अकर्मकधातूनां कर्तृवाच्ये अपि 'क्त' प्रत्ययः प्रयुज्यते। त्वम् दृष्टवान्

अहम् दृष्टवान्

त्रिषु लिंगेषु रूपाणि एवम् चलन्ति–

पुँल्लिंगे-**देववत्** पुँल्लिंगे - **भवत्वत्**

स्त्रीलिंगे - **लतावत्** स्त्रीलिंगे - **नदीवत्**

नपुंसकलिंगे-**फलवत्** नपुंसकलिंगे-**जगत्वत्**

शतृ-प्रत्ययस्य प्रयोगः

'शतृ' तथा 'शानच्' भी कृदन्त प्रत्यय हैं। ये दोनों प्रत्यय वर्तमान काल के अर्थ में प्रयुक्त होते हैं तथा 'हुए' (करते हुए) अर्थ में प्रयुक्त होते हैं। संस्कृत में भाव के लिए शतृ या शानच् प्रत्यय होता है।

यहाँ शतृ प्रत्यय के प्रयोग का अभ्यास कराया जा रहा है। शतृ में से अत् शेष रहता है तथा तीनों लिंगों में इसके रूप अलग-अलग बनते हैं-

पठ् + शतृ = **पठत्** भू+ शतृ = **भवत्**

गम् + शतृ = **गच्छत्** दृश् + शतृ = **पश्यत्** आदि।

(क) पुँल्लिग एकवचन में शतृ प्रत्यययुक्त शब्दों के रूप बनते हैं- पठन्, लिखन्, गच्छन्, हसन् आदि स्त्रीलिंग में गच्छन्ती पठन्ती आदि (ई प्रत्यय लगाकर) रूप 'नदी' शब्द रूपों की तरह बनते हैं। नपुंसकलिंग में गच्छत्-गच्छती, गच्छन्ति आदि रूप 'जगत्' शब्द के रूपों के समान चलते हैं।

यथा- बालकः लिखति = **लिखन् बालकः**

बालकः हसति = **हसन् बालकः**

बालकः गच्छति = **गच्छन् बालकः**

बालकः धावति = **धावन् बालकः**

बालकः खादति = **खादन् बालकः**

ख. स्त्रीलिंगे प्रथमा एकवचने

बालिका लिखति = **लिखन्ती बालिका**

बालिका गच्छति = **गच्छन्ती बालिका**

बालिका धावति = **धावन्ती बालिका**

(ग.) नपुंसकलिंगे प्रथमा एकवचने

यानं गच्छति = **गच्छत् यानम्**

पुष्पं विकसति = **विकसत् पुष्पम्**

जलं प्रवहति = **प्रवहत् जलम्**

पर्णं पतति = **पतत् पर्णम्**

चक्रं भ्रमति = **भ्रमत् चक्रम्**

मूलशब्द		**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**	**रूपाणि**
पठत्	पुँल्लिङ्गे	पठन्	पठन्तौ	पठन्तः	**गच्छत्**-वत्
	स्त्रीलिङ्गे	पठन्ती	पठन्त्यौ	पठन्त्यः	**नदी**- वत्
	नपुंसकलिङ्गे	पठत्	पठती	पठन्ती	**जगत्**-वत्

ध्यातव्यं यत्-शतृप्रत्ययः केवलं परस्मैपदी-धातुभिः सह एव योज्यते।

पुँल्लिगः	**स्त्रीलिंगः**
नृत्यन् बालकः आभूषणानि धारयति।	नृत्यन्ती बालिका आभूषणानि धारयति।
(i) विद्यालयं प्रविशन्तः छात्राः गुरुं नमन्ति।	(i) विद्यालयं प्रविशन्त्यः छात्राः गुरुं नमन्ति।
(ii) कथां शृण्वन् श्रोता तूष्णीम् उपविशति।	(i) कथां शृण्वन्ती श्रोत्री तूष्णीम् उपविशति।
(iii) हसन् जलं न पिबेत्।	(iii) हसन्ती जलं न पिबेत्।

शानच् प्रत्ययस्य प्रयोगः– 'करता हुआ' अर्थ में आत्मनेपदी धातुओं से शानच् प्रत्यय होता है। यथा –

सेव्+अ +शानच् (मान) = **सेवमानः** = सेवा करता हुआ।

लभ् +अ+शानच् (मान) = **लभमानः** = प्राप्त करता हुआ।

वृत् + अ + शानच् (मान) = **वर्तमानः** = उपस्थित होता हुआ।

वृध् + अ + शानच् (मान) = **वर्धमानः** = बढ़ता हुआ।

मुद् + अ + शानच् (मान) = **मोदमानः** = प्रसन्न होता हुआ।

यत् + अ + शानच् (मान) = **यतमानः** = यत्न करता हुआ।

शुभ् + अ + शानच् (मान) = **शोभमानः** = शोभित होता हुआ।

पुँल्लिंग में सेवमानः, स्त्रीलिंग में सेवमाना और नपुंसकलिंग में सेवमानम् बनेगा। इनके रूप क्रमशः = बाल (पुँ.) लता (स्त्री.) फल (नपुँ.) के समान चलते हैं।

अभ्यासः

समीचीनक्रमेण योजयतु—

१.	वदति	ज्ञातवान्
२.	पश्यति	स्मृतवान्
३.	भवति	उक्तवान्
४.	जानाति	दृष्टवान्
५.	करोति	खादितवान्
६.	खादति	अभवत्
७.	स्मरति	कृतवान्

वाक्यानि पूरयतु—

१. बालकः प्रातःकाले षड्वादने उत्थितवान्

२. भवान् ह्यः कुत्र .... ?

३. सा विद्यालये नाटकं ....।

४. अहं गतमासे परीक्षां ....।

५. चोरः वित्तकोशतः धनं.....................।

६. माता पुत्रस्य कृते मधुरभक्ष्यं ....।

७. भवती किमर्थं विलम्बेन .... ?

८. गणेशः परीक्षायाम् अधिकान् अंकान् ....।

९. सः क्रीडांगणे.......................।

१०. का अत्र पुस्तकं..................... ?

(चोरयति, ददाति, आगच्छति, प्राप्नोति, क्रीडति, लिखति, स्थापयति, अस्ति)

भूतकाले परिवर्तनं करोतु।

क.	१.	गच्छति	गतवान्	गतवती
	२.	पिबति	....	....
	३.	नयति	....	....
	४.	आगच्छति	....	....
ख.	१.	शृणोति	श्रुतवान्	श्रुतवती
	२.	ददाति	....	....
	३.	उत्तिष्ठति	....	....
	४.	शक्नोति	....	....
	५.	प्राप्नोति	....	....

ग.	१. पृच्छति	पृष्टवान्	पृष्टवती
	२. उपविशति	....	....
	३. इच्छति	....	....

लिखतु प्रयोगं च करोतु –

१. श्रमिकः कष्टं सहमानः श्रमं करोति।

२. सैनिकः युध्यमानः दिवंगतः।

३. सेवकः सेवमानः वृत्तिं लभते।

४. बाला मोदमाना क्रीडति।

५. लता वर्धमाना शोभते।

६. बालकाः मोदकानि लभमानाः हसन्ति।

७. छात्राः यतमानाः पठन्ति।

सोपानम्-३१

संख्या (गणना)

अंकाः	क्रमवाच्यः (पुँ.)	क्रमवा० (नपु)	क्रमवा० (स्त्री०)	समूहवाच्यः	(पुँ०)	(स्त्री०)	(नपु)
१.	प्रथमः	प्रथमा	प्रथमम्	एकम्	एकः	एका	एकम्
२.	द्वितीयः	द्वितीया	द्वितीयम्	द्वयम्	द्वौ	द्वे	द्वे
३.	तृतीयः	तृतीया	तृतीयम्	त्रयम्	त्रयः	तिस्रः	त्रीणि
४.	चतुर्थः	चतुर्थी	चतुर्थम्	चतुष्टयम्	चत्वारः	चतस्रः	चत्वारि
५.	पंचमः	पंचमी	पंचमम्	पंचकम्	पञ्च	–	–
६.	षष्ठः	षष्ठी	षष्ठम्	षटकम्	षट्	–	–
७.	सप्तमः	सप्तमी	सप्तमम्	सप्तकम्	सप्त	–	–
८.	अष्टमः	अष्टमी	अष्टमम्	अष्टकम्	अष्ट	–	–
९.	नवमः	नवमी	नवमम्	नवकम्	नव	–	–
१०.	दशमः	दशमी	दशमम्	दशकम्	दश	–	–
११.	एकादशः	एकादशी	एकादशम्	एकादशम्	एकादश		
२०.	विंशतितमः	विंशतितमा	विंशतितमम्	विंशकम्			
१००.	शतम्	शतम्	शतम्	शतकम्			

१. एक(एकम्)
२. द्वि(द्वे)
३. त्रि(त्रीणि)
४. चतु:(चत्वारि)
५. पञ्च
६. षट्
७. सप्त
८. अष्ट
९. नव
१०. दश
११. एकादश
१२. द्वादश
१३. त्रयोदश
१४. चतुर्दश
१५. पञ्चदश
१६. षोडश
१७. सप्तदश
१८. अष्टादश
१९. नवदश
२०. विंशति:
२१. एकविंशति:
२२. द्वाविंशति:
२३. त्रयोविंशति:
२४. चतुर्विंशति:
२५. पञ्चविंशति:
२६. षड्विंशति:
२७. सप्तविंशति:
२८. अष्टाविंशति:

२९. नवविंशति:
३०. त्रिशत्
३१. एकत्रिशत्
३२. द्वात्रिंशत्
३३. त्रयस्त्रिंशत्
३४. चतुस्त्रिंशत्
३५. पञ्चत्रिंशत्
३६. षट्त्रिंशत्
३७. सप्तत्रिंशत्
३८. अष्टत्रिंशत्
३९. नवत्रिंशत्
४०. चत्वारिंशत्
४१.एकचत्वारिंशत्
४२. द्विचत्वारिशत्
४३. त्रिचत्वारिंशत्
४४. चतुश्चत्वारिंशत्
४५. पञ्चचत्वारिंशत्
४६. षट्चत्वारिंशत्
७०. सप्तति:
७१. एकसप्तति:
७२. द्विसप्तति:
७३. त्रिसप्तति:
७४. चतु:सप्तति:
७५. पञ्चमसप्तति:
७६. षट्सप्तति:
७७. सप्तसप्तति:

७८. अष्टसप्तति:
७९. नवसप्तति:
८०. अशीति:
८१. एकाशीति:
८२. द्व्यशीति:
८३. त्र्यशीति:
८४. चतुरशीति:
८५. पञ्चशीति:
८६. षडशीति:
८७. सप्तशीति:
८८. अष्टाशीति:
८९. नवाशीति:
९०. नवति:
९१. एकनवति:
९२. द्विनवति:
९३. त्रिणति:
९४. चतुर्णवति:
९५. पञ्चनवति:
९६. षण्णवति:
९७. सप्तनवति:
९८. अष्टनवति:
९९. नवनवति:
१००. शतम्
१०१. एकाधिकं शतम्
१०२. द्व्यधिकं शतम्
१०३. द्विशतम्

एक हजार	सहस्रम्	१ लाख	लक्षम्
१० हजार	दशसहस्रम्	१० लाख	दशलक्षम्

१ करोड़	कोटिः	१० खरब	दशखर्वम्	१० पद्म	दशपद्म
१० करोड़	दशकोटिः	१ नील	नीलम्	१ शंख	शंखम्
१ अरब	अर्बुदम्	१० नील	दशनीलम्	१० शंख	दशशंखम्
१० अरब	दशार्बुदम्	१ पद्म	पद्मम्	महाशंख	महाशंखम्
१ खरब	खर्वम्				

अभ्यासः

१. लिखिए और समझिए

१. सुधा विद्यालये पञ्चाशत् छात्रासु प्रथमा अस्ति।

२. मोहनः पञ्च फलानि आनयति।

३. कक्षायाम् चतस्रः छात्राः उच्चैः पठन्ति।

४. द्वादश मासानां एकं वर्षं भवति।

५. सप्त दिनानाम् एकः सप्ताहः भवति।

६. लता छात्रासु कतमा अस्ति? प्रथमा।

७. सुरेशः भ्रातृषु कतमः अस्ति? द्वितीयः।

२. निम्नलिखित को संख्यावाची शब्दों में लिखिए -

९............१५.............२१............६८.............७०............

७५............७९.............८१............८९.............९५............

९७............९९.............१००...........१०१............२००...........

३. निम्नलिखित को संस्कृत क्रमवाची शब्दों मे लिखिए—

१. पाँचवाँ .... ६. दशवीं ....

२. सातवाँ .... ७. बीसवाँ ....

३. ग्यारहवाँ .... ८. ग्यारहवीं ....

४. पन्द्रहवाँ .... ९. सोलहवीं ....

५. आठवीं .... १०. तीसरा ....

परिशिष्टम्-१

गीतानि

पठन्तु संस्कृतं जनाः

पठन्तु संस्कृतं जनाः लिखन्तु संस्कृतं जनाः।
पिबन्तु मानवा मुदा सदा सुसंस्कृतामृतम्।।

कुलेषु मातरः सुतैः सुताश्च मातृभिः सह।
लपन्तु संस्कृतं हृदा स्वभावतः परस्परम्।।
कनिष्ठका वरिष्ठकैः परस्परं दिवानिशम्।
सुखेलनेऽशने तथा वदन्तु लोकसंस्कृतम्।।१।।

सुलालने सुपालने सुखेन मातरः शिशून्
सदैव श्रावयन्तु रे! लयेन लोरि-संस्कृतम्।।
विवाह-भोज-संगमे सुपेयखाद्यव्यञ्जनम्।
स्वदन्तु हर्षनिर्भराः पदे-पदे च संस्कृतम्।।२।।

पदार्थ-वस्तुचित्रणे रसालयेषु संस्कृतम्।
विलोकयन्तु भाषितुं जना हि संस्कृताक्षरम्।।
सुचित्रशालसज्जनं यदा स्वकक्षमण्डनम्।
भवेत्तदा प्रहेलिका-सुगीत-काव्यवर्णनम्।।३।।

सभासु गीतगायने मनोज्ञरागरञ्जने।
निरन्तरं स्वजीवने सदाऽस्तु राष्ट्रचिन्तनम्।।
विकासगीतसंस्कृतं स्वदेशगीतसंस्कृतम्
प्रयाणगीतसंस्कृतं मुखे-मुखे स्वगौरवम्।।४।।

रचयिता-**आचार्य वासुदेव द्विवेदी**

प्रभु-स्तुतिः

प्रभो ! सूर्यरूपे विभासि त्वमेव
विभो ! दीप्यते चन्द्ररूपं तवेव ।
त्वमेवाग्निरूपे त्वमाकाशरूपे
प्रभो ! वायुरूपे त्वमेवासि प्राणः । ।१ । ।

गिरिस्त्वं धरावृक्षनद्यस्त्वमेव
प्रभो ! पुष्परूपे त्वदीयो विकासः ।
त्वमेवात्मरूपे शरीरेषु दीप्तः
विभो ! सर्वरूप ! प्रभो ! नो नमस्ते । ।२ । ।

शिशुस्त्वं हि माता पिता च त्वमेव
कुटुम्बं त्वमेव त्वमेवासि स्नेहः ।
त्वमेवासि विद्या च मित्रं त्वमेव
प्रभो ! त्वं हि वित्तं त्वमेवासि सौख्यम् । ।३ । ।

त्वमेवासि शिष्यः गुरुश्चापि दीक्षा
त्वमेवासि वेदस्मृतिग्रन्थसारः ।
त्वमेवासि दृश्यं त्वमेवाप्यदृश्यं
विभो ! सर्वरूप ! प्रभो ! नो नमस्ते । ।४ । ।

गुरुद्वारगिर्जागृहेषु त्वमेव
त्वमेव प्रभो ! मस्जिदे मन्दिरेषु ।
व्रतीनां मुनीनां मठेषु त्वमेव
निराकारसाकारयुक्तः प्रभो ! त्वम् । ।५ । ।

अनित्यञ्च नित्यं त्वमेवासि सर्वं
स्थिरं वास्थिरं चाचलं चञ्चलं वा ।
त्वमेवासि स्रष्टा च सृष्टिस्त्वमेव
विभो ! सर्वरूप ! प्रभो ! नो नमस्ते । ।६ । ।

–रचियता
डॉ० जीतरामभट्टः

लोकहितं मम करणीयम्

मनसा सततं स्मरणीयम्
वचसा सततं वदनीयम्
लोकहितं मम करणीयम्।। ।लोकहितं मम करणीयम्।१।

न भोगभवने रमणीयम्
न च सुखशयने शयनीयम्।
अहर्निशं जागरणीयम्।
लोकहितं मम करणीयम्।। ।मनसा सततं स्मरणीयम्।२।

न जातु दुःखं गणनीयम्
न च निजसौख्यं मननीयम्।
कार्यक्षेत्रे त्वरणीयम्
लोकहितं मम करणीयम्।। ।मनसा.............।३।

दुःखसागरे तरणीयम्
कष्टपर्वते चरणीयम्
विपत्तिविपिने भ्रमणीयम्
लोकहितं मम करणीयम्।। ।मनसा.............।४।

गहनारण्ये घनान्धकारे
बन्धुजना ये स्थिताः गह्वरे।
तत्र मया सञ्चरणीयम्
लोकहितं मम करणीयम्।। ।मनसा.............।५।

रचयिता—**डॉ० श्रीधर भास्कर वर्णेकरः**

सुरससुबोधा विश्वमनोज्ञा

सुरससुबोधा विश्वमनोज्ञा
ललिता हृद्या रमणीया।
अमृतवाणी संस्कृतभाषा
नैव क्लिष्टा न च कठिना।।१।। नैव क्लिष्टा....................।

कविकोकिल-वाल्मीकि-विरचिता
रामायण-रमणीयकथा।
अतीव सरला मधुरमञ्जुला
नैव क्लिष्टा न च कठिना।।२।। सुरस....................।

व्यासविरचिता गणेशलिखिता
महाभारते पुण्यकथा।
कौरवपाण्डव-सङ्गरमथिता
नैव क्लिष्टा न च कठिना।।३।। सुरस....................।

कुरुक्षेत्र-समराङ्गणगीता
विश्ववन्दिता भगवद्गीता।
अमृतमधुरा कर्मदीपिका
नैव क्लिष्टा न च कठिना।।४।। सुरस....................।

कविकुलगुरु-नवरसोन्मेषजा
ऋतु-रघु-कुमार-कविता।
विक्रम-शाकुन्तल-मालविका
नैव क्लिष्टा न च कठिना।।५।। सुरस....................।

रचयिता-**श्रीवसन्त गाडगिलः**

वसुधैव कुटुम्बकमस्ति सखे!

पृथिवी जननी तु सुताश्च वयम्
मनुजाः सकलाः भुवि सन्ति समाः।
न करोतु घृणां न च योधयतु
वसुधैव कुटुम्बकमस्ति सखे!!१!!

प्रकृतिश्च समा विकृतिश्च समा
वसनं च समं हसनं च समम्।
वचनं च समं गमनं च समम्
वसुधैव कुटुम्बकमस्ति सखे!!२!!

धरणीह समा गगनं च समम्
अनलश्च समः पवनोऽपि समः।
सविताऽपि समोऽत्र समश्च शशिः
वसुधैव कुटुम्बकमस्ति सखे!!३!!

सरितश्च समाः गिरयश्च समाः
विटपाश्च समाः लतिकाश्च समाः।
कुसुमानि समानि फलानि तथा
वसुधैव कुटुम्बकमस्ति सखे !!४!!

यदि सन्ति सखे विषमाः स्थितयः
यदि वा कलहश्च भवेत् समरः।
इदमेव सदा दिशतु स्वजनान्
वसुधैव कुटुम्बकमस्ति सखे!!५!!

रचयिता – **डॉ० जीतराम भट्टः**

सुभाषितानि-१

विपदि धैर्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः।
यशसि चाभिरुचिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम्।।
-नीतिशतकम्-६३

पापान्निवारयति योजयते हिताय
गुह्यं निगूहति गुणान् प्रकटी करोति।
आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः।।
-नीतिशतकम्-६९

मातेव रक्षति पितेव हिते नियुङ्क्ते
कान्तेव चाभिरमयत्यपनीय दुःखम्।
कीर्तिं च दिक्षु वितनोति ददाति लक्ष्मीं
किं किं न साधयति कल्पलतेव विद्या।
-चाणक्यराजनीतिशास्त्रम्-२.३५

जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्सङ्गतिः कथय किं न करोति पुंसाम्।।
-नीतिशतकम्

अनन्तशास्त्रं बहु वेदितव्यम्-
अल्पश्च कालो बहवश्च विघ्नाः।
यत्सारभूतं तदुपासितव्यं
हंसो यथा क्षीरमिवाम्बुमिश्रम्।।
-नराभरणम्-११९

सुभाषितानि -२

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः
दैवं हि दैवमिति कापुरुषा वदन्ति।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोऽत्र दोषः।।
-पञ्चतन्त्रम्-२.१३७

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः।।
-नीतिशतकम्-७९

भवन्ति नम्रास्तरवः फलागमै-
र्नवाम्बुभिर्दूरविलम्बिनो घनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम्।।
-अभिज्ञानशाकुन्तलम्-५.१२

प्रारभ्यते न खलु विघ्नभयेन उच्चैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमगुणा न परित्यजन्ति।।

-मुद्राराक्षसम्-१.१७

सुन्दरसुरभाषा

मुनिवर विकसित-कविवर-विलसित-
मञ्जुल-मञ्जूषा, सुन्दर सुरभाषा।
अयि मातस्तव पोषण-क्षमता
मम वचनातीता, सुन्दरसुरभाषा।।१।। मुनिवर....

वेदव्यास-वाल्मिकी-मुनीनां
कालिदास-बाणादि कवीनाम्।
पौराणिक-सामान्यजनानां।
जीवनस्य-आशा, सुन्दरसुरभाषा।।२।। मुनिवर....

श्रुतिसुखनिनदे सकलप्रमोदे
स्मृतिहितवरदे सरसविनोदे।
गति-मति-प्रेरक-काव्यविशारदे
तव संस्कृतिरेषा, सुन्दरसुरभाषा।।३।। मुनिवर....

नवरस-रुचिरालङ्कृति-धारा
वेदविषय-वेदान्त-विचारा।
वैद्य-व्योम-शास्त्रादि-विहारा।
विजयते धरायां, सुन्दरसुरभाषा।।४।। मुनिवर....

रचयिता-**श्रीनारायण भट्टः**

परिशिष्टम्-२

।। दश-दिनेषु संस्कृतस्य व्यवहार-शिक्षणाय पाठ्यक्रमः।।

प्रथमे दिने

१. नाम (एकवचनम्) (परिचयः)

अहं केशवः! भवान् कः? भवती का? भवान्, भवती, कः, का?
मम नाम ...., भवत्याः किम् नाम?

२. सर्वनामानि, लिंगभेदः, त्रीणि लिंगानि।

एषः बालः, एषा बालिका, एतद्, तद्।

३. षष्ठी विभक्तिः। प्रथमा विभक्तिः। आप्तवर्गः।

रामस्य, कृष्णस्य, सीतायाः, रमायाः
पतिः, पत्नी, जनकः, जननी, पिता, माता, पुत्रः, कन्या।
एतस्य, एतस्याः, तस्य, तस्याः, कस्य, कस्याः, यस्य, यस्याः।
रामस्य माता कौसल्या। वासुदवेस्य पुत्रः कृष्णः।। ...इत्यादिः।

४. 'न' 'आम्' इत्यस्य प्रयोगः।

किम् रामस्य पिता वाल्मीकिः ? – न।
किम् कुशस्य माता सीता ? – आम्। इत्यादिः।

५. क्रियाशब्दाः (एकवचनम्-प्रथमे, उत्तम पुरुषे च)

अस्मि, करोमि, भवामि, गच्छामि, खादामि इत्यादिः।
अस्ति, करोति, भवति, गच्छति, खादति इत्यादिः।

६. अव्ययशब्दाः

अत्र, तत्र, कुत्र, यत्र, यत्र-तत्र।
अत्र (समीपे) तत्र (दूरे) कुत्र (स्थानपृच्छा)

७. संख्या-विशेषणानि

एकतः दशपर्यन्तम्-एक, द्वि, त्रि, चतुर् (रूपाणि)

एकः। एका। एकम्। त्रयः, तिस्रः, त्रीणि, चत्वारः, चतस्रः, चत्वारि। द्वि-द्वयम्, त्रि-त्रयम्, चतुर्-चतुष्टयम्, बालकद्वयम्, छात्रत्रयम्, देवताचतुष्टयम्।

८. संस्कृतभाषा-वैशिष्ट्यानि

क्रियाशब्दानां लिंगभेदः नास्ति।

वाक्ये पदानां स्थानपरिवर्तनेन अर्थस्य हानिः न भवति।

९. अभ्यासः गृहपाठः।

संख्यायावाचकानां वाक्येषु उपयोगः।

षष्ठी-विभक्त्याः उपयोगः वाक्येषु।

अपूर्णानि वाक्यानि पूर्णीकर्तव्यानि।

१०. **'पठन्तु संस्कृतम् जनाः'** इति गीतम्।

द्वितीये दिने

१. एकवचनम्-बहुवचनम्।

सर्वनामानि-अहं, वयम्। भवान् भवन्तः। भवती, भवत्यः। एषः, एते। एषा, एताः। एतद्, एतानि। सः, ते। सा, ताः।, तद्, तानि। कः, के। का, काः। किम्, कानि। यः,ये। या, याः। यद्, यानि। इत्यादिः

नामानि क्रियाशब्दाः-रामः, रामाः। शाला, शालाः, नदी, नद्यः। कविः, कवयः। गच्छामि, गच्छामः। गच्छति, गच्छन्ति। इत्यादिः।

२. द्वितीया-सप्तमी (विभिक्ति-प्रयोगः)

गृहं गच्छति। देवालयं गच्छति। पुस्तकं पठति। इत्यादिः।

गृहे भोजनं करोमि। कूपे जलम् अस्ति। इत्यादिः।

दश वाक्यानि प्रत्येकं विभक्त्याः।

देवालयं, गृहं, संस्कृतं, पुस्तकं, पत्रं, पत्रकं, उत्तरं, आम्रं, अन्नं, जलं, लेखनीं, क्रीडनं, वीणां, वंशीं इत्यादिः। पोलिकां, श्रीखण्डं, चायं, दुग्धं, शीतलपेयम्। गच्छ्, पठ्, लिख्, खाद्, पिब्, क्षिप्। गृहे, वने कूपे, द्वारे, कोटरे, रामायणे, महाभारते। गंगायां, यमुनायां, नद्यां, गीतायां। पुस्तके, देवालये, मन्दिरे, कासारे।

३. अव्ययशब्दाः।

च, अपि, हि, वा, किन्तु, परन्तु, किल।

४. सप्तवासराणां परिचयः।

५. देहस्य अवयवाः (मस्तकात् ग्रीवापर्यन्तम्।

शिरः, मस्तकम्, केशः, ललाटः, भालः, भ्रूः, नासिका, नेत्रम्, कपोलः, मुखम्, कर्णः, चिबुकम्, हनुः, कण्ठः, ग्रीवा, जिह्वा, दन्तः।

६. अवयवसंबन्धिनः क्रियाशब्दाः।

पश्यति, जिघ्रति, शृणोति, भक्षयति, खादति, वदति, गिलति, चर्वति, आस्वादते।

७. पशवः/पक्षिणः (तेषां रवाः/कूजनानि)

चटका, काकः, पिकः, शुकः, मयूरः, चिल्लः, पारावतः, कुक्कुरः मार्जारः, मूषकः, धेनुः, वृषभः, कुक्कुटः, चिव्, काव्, कुहूकुहू, विठूविठू, केका, गुटूरगूँ, भौं भौं (बुक्कति) म्याँव्, हम्बारवः, आरवः।

८. आप्तवर्गः

सहोदरः, भ्राता, सहोदरा, भगिनी, पितामहः, पितामही, मातामहः, मातामही, पितृव्यः, पितृव्या, मातुलः, मातुलानी, मातृभगिनी।

९. ग्रन्थपरिचयः।

चत्वारः वेदाः, अष्टोत्तरशत-उपनिषदः, विंशतिः स्मृतयः, षड् दर्शनग्रन्थाः, दश मुख्या उपनिषदः इत्यादिः।

११. **'प्रभु-स्तुतिः'** इति गीतम्।

तृतीये दिने

१. विशेषणानि। विशेष्यानि।

२. वर्णाः (श्वेतः, कृष्णः, नीलः, पीतः, हरितः, काषायः, पाटलः, कपिशः, रक्तः इत्यादिः)

यथा-आकाशस्य वर्णः नीलः । शशकः श्वेतः। काकः कृष्णः, मयूरः नीलवर्णः, ध्वजः काषायवर्णः इत्यादि।

३. अद्य, श्वः, समय-संबन्धः।

अद्य, श्वः, परश्वः, ह्यः, परह्यः। वासराणां उपयोगेन पाठनम्।

४. शरीरस्य अवयवाः ग्रीवातः पादपर्यन्तम्।

हृदयम्, वक्षः, उदरम्, स्कन्धः, भुजः, मणिबन्धः, कटिः, ऊरुः, पादः, नखः, अंगुष्ठः, कूर्चः, नितम्बः इत्यादिः।

५. अव्ययशब्दाः।

पश्चात्, पूर्वम्, अतः, यतः, कुतः, ततः, इतः, परम् इत्यादिः।

६. भूतकालः भूतकालवाचकानि।

अभवम्, अभवत्, अभवताम्, अभवन्।

गतवान्, गतवती, नीतवान्, नीतवती।

७. संख्यावाचकाः —एकादशतः अग्रे।

पञ्चतः अग्रे संख्यावाचकानां लिंगभेदः न वर्तते। यथा-पञ्च शिष्याः, षट् शास्त्राणि, दश अवताराः इत्यादिः।

८. संख्यालेखनम्-संख्यावाचनम्।

५७, ९५, १०३, ३०७, ८७८, ५३१२, २, ७०, ३१, ५९९, इत्यादिः।

९. कर्मणि-विध्यर्थी-धातुसाधित-विशेषणानि।

कार्यम्, कर्तव्यम्, करणीयम्, स्मरणीयम्, चरणीयम् इत्यादिः।

१०. ग्रन्थपरिचयः।

दर्शनानि-सांख्य, योग, न्याय, वैशेषिक, पूर्वमीमांसा, उत्तरमीमांसा (वेदान्त)। जैन, बौद्ध, दर्शनानि गीता च।

११. गीतपठनम् - **लोकहितं मम करणीयम्।**

चतुर्थे दिने

१. समय-पाठः।
   सचित्रं पाठनम्।
   पादः, अर्धः, पादोनः, सपादः, सार्धः, अधिकः, ऊनः।

२. काल-मापनम्।
   दिनः, २४ होराः, ६० निमिषाः, ६० विनिमिषाः। संवत्सरः, युगम्, मासः, ऋतुः, पक्षः, सप्ताहः।

३. योग्य-समय-कथनम्। अभ्यासः

४. तुमुन् प्रत्ययस्य प्रयोगः। (हेत्वर्थकाः) पृच्छा-किमर्थम्?
   गन्तुम्, नेतुम्, पठितुम्, स्थातुम् इत्यादिः।

५. पञ्चमी विभक्तिः-तः प्रत्ययस्य उपयोगः।
   इतः, यतः, कुतः, ततः, स्थानात्, कालात्, गृहतः, शाखातः इत्यादिः

६. नमः, (चतुर्थी विभक्तिः)।
   संप्रदाने-चतुर्थी। गणेशाय नमः, तुभ्यं नमः। रामाय, सीतायै-इत्यादिः। शिष्यः शिक्षकाय पुष्पं ददाति इत्यादिः।

७. ग्रन्थपरिचयः- कालिदास-लिखितानां ग्रन्थानां परिचयः।

८. गीतम्-**सुरससुबोधा......**।

पञ्चमे दिने

१. क्त्वान्त-ल्यबन्त (पूर्वकालवाचकानि)।

गत्वा, नत्वा, मत्वा, भूत्वा, दत्त्वा, इत्यादिः। आनीय, आगत्य, पिधाय, उद्घाट्य, निर्वाप्य, प्रक्षाल्य, प्राप्य, स्थाप्य इत्यादिः।

१०. क्रमवाचकाः/लिंगभेदः।

प्रथमः, प्रथमा, प्रथमम्। द्वितीयः, द्वितीया, द्वितीयम्। तृतीयः, तृतीया, तृतीयम्। चतुर्थः, चतुर्थी, चतुर्थम्। पञ्चमः, पञ्चमी, पञ्चमम्। षष्ठी, षष्ठः, षष्ठम्। सप्तमः, अष्टमः, नवमः, दशमः, एकादशतमः, शततमः, इत्यादिः। कतमः? कतमा? कतमम्?।

३. अव्ययशब्दाः।

अन्तर्, बहिः, इव, एव, कृते।

४. समयपाठस्य अभ्यासः।

५. व्यवहार-कोशः।

गृहविषये, पेयपानविषये, पाकगृहे।

६. परिधान-वस्त्र-विषये।

७. तृतीया विभक्तिः-करण-संबन्धः।

सह, विना। खड्गेण हतः। इत्यादिः

८. ग्रन्थाः-महापुरुषाणां परिचयः

सप्त-ऋषयः, शास्त्रज्ञाः, शास्त्रग्रन्थाः।

९. अभ्यासः। क्रमवाचकानाम् उपयोगः। समयकथने प्रश्नोत्तराणि। व्यवहार- शब्दानाम् उपयोगार्थं प्रश्नोत्तराणि।

१०. सुभाषितानां पाठः।

षष्ठे दिने

१. आज्ञार्थः/विज्ञप्तिः/प्रार्थना।

भवतु, गच्छतु, अस्तु, करोतु, लिखन्तु, चलन्तु, कुर्वन्तु, पश्यन्तु, पठन्तु, नयन्तु, आनयन्तु, इत्यादिः। तत्तु गच्छतु, तथा अस्तु, मा अस्तु इत्यादिः।

२. अव्ययशब्दाः। शब्दयुग्मानि।

यदि-तर्हि, यदा-तदा, नो-चेत्, यद्यपि-तथापि, यत्र-तत्र, यथा-तथा, इतः पूर्वं, यानि-तानि, पुनः पुनः शनैः शनैः।

३. सार्वनामिक-विशेषणानि।

ईदृशः, तादृशः, यादृशः, कीदृशः, एतादृशः। (पुँ, स्त्री, नपुं., भिन्नानि रूपाणि)

४. संवादरूपेण संभाषण-प्रकाराः।

माता पुत्री च, पिता पुत्रः च, अग्रजः अनुजः च, अग्रजा अनुजा च, गुरु शिष्यः च। इत्यादिः

५. दिनक्रमविषये।

प्रातः प्रबोधनम्, व्यायामः, ईशस्मरणम्, स्नानम्, प्रातराशः इत्यादिः।

६. आप्तवर्गाः।

अभ्यासः। वाक्यानां रचनाः। सर्वे आप्तवर्गशब्दाः तालिकारूपेण लेखनीयाः।

७. भविष्यत्कालः।

गमिष्यामि, गमिष्यामः, गमिष्यति, गमिष्यन्ति इत्यादिः। श्वः, परश्वः, आगामिनि मासे, ऋतौ, संवत्सरे इत्यादिः।

८. अभ्यासः

संभाषणप्रकाराणां नाट्यरूपाणां (संवादमाध्यमेन) लेखनम्

९. भारत देश-परिचयः।

प्रदेशाः, पर्वताः, नद्यः, ऋतवः, संस्कृतिः भाषाः, साहित्यम् इत्यादिः।

१०. गीतम्-'**वसुधैव कुटुम्बकम्**'।

<u>सप्तमे दिने</u>

१. भोजन-समये संभाषणम्।

पाक-सिद्धिः, धान्यानि, अन्ये पदार्थाः, क्रियाशब्दाः, अन्नपदार्थाः, भोजनप्रबन्धः, परिवेषणविषये शब्दाः, आसनानि, तृप्तिः, अतृप्तिः, अपक्वं, सुपक्वम् इत्यादिः।

२. रुचिशब्दाः।

कटु, अम्लम्, लवणम्, तीक्ष्णम्, तिक्तम्, मधुरम्, कषायम्, ऊष्णम्, शीतम्, गतरसम्, पर्युषितम्।

३. शब्द-युग्मानि।

यत्- तत्, ये-ते, या-सा, यः-सः, याः-ताः, यानि-तानि।

४. स्म-शब्देन भूतकालस्य प्रयोगः।

५. समयवाचकाः, नियतकालवाचकाः।

दिवा, रात्रौ, प्रातः, मध्याह्ने, अपराह्णे, अहः, रात्रिः, प्रहरः, अहोरात्रं, दैनिकं, साप्ताहिकं, पाक्षिकं, मासिकं, सांवत्सरिकम् इत्यादिः।

६. यानानि/प्रवासः।

यानप्रकाराः, चालकः, वाहकः, स्थानकं, रेलयात्रा, यायायातप्रकाराः, गन्त्री, भ्रमणं, प्रवासः। इत्यादिः।

७. अन्तरिक्षपरिचयः।

सूर्यः, चन्द्रः, तारकाः, ग्रहाः, नक्षत्राणि, भ्रमणं, परिभ्रमणं, कक्षा, सूर्यमण्डलम्, दिनवृद्धिः इत्यादिः।

८. पत्र-प्रेषणम्।

पत्रलेखनम्, लेखनक्रमः, नाम, संकेतः, व्यवसायः, जन्मतिथिः, वयः, व्यावसायिकं पत्रम्, अभिवादनम्, स्नेहपत्रं, याचनापत्रं, प्रार्थनापत्रं, आमन्त्रणपत्रं, प्राप्तिपत्रं, संमतिपत्रम् इत्यादिः।

९. गीतम्-'**सुन्दर सुरभाषा**'

अष्टमे दिने

१. संभाषण-प्रकाराः। (संवादमाध्यमेन)

रुग्णः वैद्यः च, ग्राहकः विक्रेताः च (वस्त्रम्, औषधिः, धान्यम् इत्यादिः।) रेलस्थानके, बसस्थानके, ग्रन्थालये। सीवकः सौचिकः लौहकारः, सुवर्णकारः, काष्ठकारः, स्थपतिः, सेवक, स्वामी, गृहस्थः अतिथिश्च। अतिथ्यसंभाषणम्।

२. आप्तवर्गाः। विविधानां संबन्धानां दर्शनम्।

वाक्येषु उपयोगः। स्नेहः अनुरागः, क्रोधः, मत्सरः, लोभः, मोहः इति भावनानां विषये परस्परं-संभाषणानि।

३. भारत-परिचयः - महापुरुषाणां, संस्कृतवाङ्मयस्य, संस्कृतविदुषां विदुषीनाञ्च परिचयः।

४. गीतानाम् अभ्यासः (पूर्वदिवसेषु गीतानां संस्कृतकाव्यानाम् अभ्यासः)

५. सुभाषितानां पाठः।

नवमे दिने

१. जिज्ञासूनाम् अभिव्यक्तिः संभाषणं भाषणं च।

प्रबन्धः, अतिथीनां स्वागतम्, आसनग्रहणार्थं निवेदनं, मार्गदर्शनं प्रार्थना च। कार्यक्रम-पत्रिका-निवेदनं, आगतानां परिचय-प्रदानं, प्रास्ताविकम्, मुख्यातिथिभ्यः भाषणार्थं प्रार्थना, कृतज्ञता, सूचना-प्रकटनं, गीतगायनम्, प्रसाद-वितरणं 'पुनरागमनाय' सम्प्रार्थ्य अतिथीनां कृते शुभगमनम्।

२. छात्राणां मध्ये अभिनयेन नाट्येन वा संस्कृतवार्तालापः।

४. शिक्षार्थिनाम् अभिमतप्रदर्शनम्।

५. संस्कृत-वाङ्मय-परिचयः।

६. गीतानाम् गानम् (समूहे)

७. सुभाषितानां पाठः।

दशमे दिने

१. विगतदिवसेषु कृत-अभ्यासक्रमस्य सूत्ररूपेण पुनः स्मरणम्।

२. जिज्ञासूनां कृते संस्कृत-व्यवहाराय निर्देशाः-

(क) प्रतिदिनं संस्कृते भाषणप्रयत्नः।

(ख) शब्दकोशः सवंर्धितव्यः।

(ग) प्रतिदिनं संस्कृते लेखनम्।

(घ) मासिक-मेलनार्थं सूचनाः संस्कृते व्यवहार-प्रबन्धश्च।

(ङ) सुभाषितानां, गीतानां, स्तोत्राणां कण्ठस्थीकरणम्।

(च) शिक्षक-जिज्ञासु-संवादः पत्रव्यवहारेण दृढीकर्तव्यः।

(छ) संस्कृत-व्यवहाराय संवाद-कार्यशाला।

३. समारोप-कार्यक्रमः

।।शान्तिपाठः।।

ॐ द्यौः शान्तिः अन्तिरिक्षं शान्तिः। पृथिवी शान्तिः।
आपः शान्तिः। औषधयः शान्तिः। वनस्पतयः शान्तिः,
विश्वदेवाः शान्तिः। ब्रह्म शान्तिः। सर्वं शान्तिः। शान्तिरेव शान्तिः।
सा मा शान्तिरेधि। ॐ शान्तिः शान्तिः शान्तिः।।